अखिलभारतीय–प्राच्यविद्यासम्मेलनम्
शतवर्षमहोत्सवग्रन्थमाला–१२

भट्टमल्लविरचिता

आख्यातचन्द्रिका

(पुनर्मुद्रणम्)

प्रधानसंपादकः
आचार्यः श्रीनिवासः वरखेडी
कुलगुरु

संपादकः
आचार्यः मधुसूदनः पेन्ना
संचालकः संशोधन–प्रकाशनविभागः

राष्ट्रहिताय संस्कृतम्

कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः
रामटेकम्, जि. नागपुरम् (महाराष्ट्रम्)
तथा
न्यू भारतीय बुक कॉर्पोरेशन, नव देहली
2020

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

अखिलभारतीय–प्राच्यविद्यासम्मेलनम्
शतवर्षमहोत्सवग्रन्थमाला – 12

भट्टमल्लविरचिता

आख्यातचन्द्रिका

(पुनर्मुद्रणम्)

प्रधानसंपादकः
आचार्यः श्रीनिवासः वरखेडी
कुलगुरु

संपादकः
आचार्यः मधुसूदनः पेन्ना
संचालकः संशोधन–प्रकाशनविभागः

राष्ट्रहिताय संस्कृतम्

कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः
रामटेकम्, जि. नागपुरम् (महाराष्ट्रम्)
2020

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

शीर्षकम् — आख्यातचन्द्रिका (पुनर्मुद्रणम्)

लेखकः — भट्टमल्लः

प्रधानसंपादकः — आचार्यः श्रीनिवासः वरखेडी
कुलगुरु, क.का.सं.वि., रामटेकम्

संपादकः — आचार्यः मधुसूदनः पेन्ना
संचालकः संशोधन–प्रकाशनविभागः
क.का.सं.वि., रामटेकम्

अखिलभारतीय–प्राच्यविद्यासम्मेलनम् — प्रो. गौतमः पटेल, अध्यक्षः
प्रो. सरोजा भाटे, सचिवा
प्रो. गणेशः थिटे, उपाध्यक्षः

संपादकमण्डलम् — डॉ. दिनकर मराठे, क.का.सं.वि., रामटेक
डॉ. वीणा गानु, नागपुर.

प्रकाशनवर्षम् — **2020**

आवृत्तिः — प्रथमा

मूल्यम् — **110.00**

आय.एस.बी.एन. — 978-8183-153-782

मुखपृष्ठम् — श्री. उमेश पाटील, क.का.सं.वि., रामटेकम्

मुद्रकः — एस.के.प्रिन्टर्स, दिल्ली

प्रकाशकः — कुलसचिवः,
कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः,
प्रशासकीयभवनम्, मौदामार्गस्य, रामटेकम्.
तथा
न्यु भारतीय बुक कार्पोरेशन, नवी दिल्ली

The KK Sanskrit University does not hold any responsibility regarding the content, language, originality, Plagiarism or views expressed by the author of these centenary publication books. The respective author is solely responsible.

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

PREFACE

It is indeed a matter of great pleasure and pride for Kavikulaguru Kalidas Sanskrit University, Ramtek to have this rarest opportunity of hosting the 50th session of All India Oriental Conference at Nagpur. This AIOC-50th session at Nagpur will be forever remembered by all as the year 2019 also happens to be the year of Centenary Celebration of AIOC. The premier objective with which the great scholars of yester years had contemplated and established this national academic event called All India Oriental Conference has been achieved through these years with scores of young scholars contributing significantly to the treasure house of knowledge through their valuable research work.

The research of yore and of the present should be properly recorded so as to make it easily available to all lovers of knowledge and wisdom in the years to come. With this objective, we have contemplated to commemorate the 100th year of this grand event of 50th session of AIOC by way of publishing 100 monographs on different subjects in four languages viz., Sanskrit, Hindi, Marathi and English. It is no doubt a herculean task but still worth of it, for the reason that these 100 monographs will inspire many young scholars to take upon a fresh study and research of the oriental subjects with more vigour and zeal.

The AIOC Centenary Publication Series includes wide variety of subjects like Literature, Language, Veda, Indian Philosophy, Sanskrit Grammar, Law, Children Literature, Yoga, Astronomy and Astrology, Ayurveda, Pali, Prakrit, Jain, Buddhism, Education, Library Science, Poetics, Aesthetics, and Indology. It also includes reprint of some rare texts of academic importance which have gone out of print are not easily available. We wish to mark this centenary celebrations with this series that connects the glory of the past and aspirations of future. I place on record my sincere gratitude to all the authors of these monographs who have kindly contributed to the richness of this

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

series.

I am confident that the books published in these series will definitely inspire the lovers of Oriental Learning in general and of Sanskrit Language and Literature in particular.

On this occasion, we have published a memorable book of all the speeches of Section-Presidents of all previous sessions of AIOC. It is indeed a very capacious addition to any collection. I with all respect thank two eminent scholars of our times - Prof. Gautam Patel, President and Prof. Saroja Bhate, General Secretary, the torch bearers of AIOC who have not only encouraged us in this venture but also made all efforts to provide these valuable historical speeches for us. I thank all executive members of AIOC and my colleagues of the varsity for making this event a grand success. My words fall short in describing the painstaking efforts and scholarly commitment of my esteemed colleague Prof. Madhusudan Penna, local secretary of this session in bringing out this series.

I also take this opportunity to profusely thank Shri. Subhash Jain and Shri Dipak Jain, the proprietors of New Bharatiya Book Corporation, New Delhi for their enthusiastic approach and timely work with all precision and grace.

Let us all sanctify ourselves in the eternal flow of wisdom by reading these books and recommending these to others also!

सरस्वती श्रुतिमहती महीयताम्

Ramtek
10th January 2020

Prof. Srinivasa Varakhedi
Vice Chancellor, KKSU

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

Kavikulaguru Kalidas Sanskrit University
All India Oriental Conference

100th Year 50th Session
10th-12th January, 2020

Chief Patron
Hon'ble Nitin Gadkari
Minister of Road, Transport & Highways of India

Patron
Prof. Srinivasa Varakhedi
Vice Chancellor, KKSU, Ramtek

AIOC President
Prof. Gautam Patel
Chairman, Sanskrit Seva Samiti, Ahmedabad.

AIOC General Secretary
Prof. Saroja Bhate
Professor of Sanskrit (Retd.), Pune University, Pune

AIOC Local Secretary
Prof. Penna Madhusudan
Dean, KKSU, Ramtek

Additional Local Secretary
Dr. Harekrishna Agasti
Dr. Kalapini Agasti
Dr. Dinakar Marathe
Dr. Parag Joshi

Organising Committee
Prof. C.G. Vijayakumar, Registrar (I/c) & Dean, KKSU, Ramtek
Prof. Nanda Puri, Dean, KKSU, Ramtek
Prof. Krishnakumar Pandey, Dean, KKSU, Ramtek
Prof. Laita Chandratre, Dean, KKSU, Ramtek
Dr. Ramachandra Joshi, Finance Officer, KKSU, Ramtek
Dr. Umesh Shivahare, Controller of Examination, KKSU, Ramtek
Dr. Dipak Kapade, Librarian, KKSU, Ramtek
Dr. Renuka Bokare, PRO, KKSU, Ramtek
Shri. Rajiv Ranjan Mishra, Technical Head, KKSU, Ramtek
Shri. Pravin Kalambe, Security Officer, KKSU, Ramtek

CC-0. Kavikulaguru Kalidas Sanskrit University Ramtek Collection

Reception Committee

Prof. Srinivasa Varakhedi, Chairperson Reception Committee & VC, KKSU
Parampujya Govindagiri Swamiji, Rishikesh
Prof. P.T. Chande, Former VC, KKSU
Prof. Uma Vaidya, Former VC, KKSU
Prof. Vijendra Kumar, VC, National Law University, Nagpur
Prof. Rajnish Shukla, VC, National Hindi University, Wardha
Prof. Vinayak Kane, VC, RTM Nagpur University, Nagpur
Shri. Krupal Tumane, Member of Parliament
Shri. Girishji Vyas, Member of Legislative Council
Shri. Chandrashekhar Bawankule, Guardian Minister, Nagpur
Prof. Vishram Jamdar, Director, VNIT, Nagpur
Dr. Bhushankumar Upadhyay, Commissioner of Police, Nagpur
Shri. Vijay Phanshikar, Editor, The Hitavada, Nagpur
Shri. Rajkumar Tirpude, Tirpude Group of Insitutions, Nagpur
Shri. Mohabbat Singh, Tuli International, Nagpur.
Shri. Chandragupta Varnekar, Principal Retd., Nagpur
Shri. Suresh Sharma, Baidyanath, Nagpur
Shri. Prabhakar Rao Mundle, Dharampeth Educational Institutions, Nagpur

Executive Committee

Prof. G. U. Thite,
Vice President

Dr. Brijeshkumar Shukla,
Treasurer

Members

Dr. Rajni Satish Chandra Jha
Prof. Shukla Ramakant
Dr. Behera Ranjit
Dr. Meena Shukla
Dr. Nirmala Kulkarni
Dr. Roy Gauri Nath
Dr. Tripathi Uma Rani
Dr. Pushpa Jha
Dr. Basu Ratna
Dr. Mithilesh Kumar
Prof. Singh Prasoon Dutta
Shri. Mishra Arun Ranjan
Dr. Mishra Baidyanath
Dr. Tripathi Rajendra Rasraj
Shri. Harshdev Madhav
Dr. Kamdev Jha
Dr. Parinita Deshpande
Dr. Jha Udayanath (Ashok)

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

भट्टमल्लविरचिता

आख्यातचन्द्रिका

प्रशस्तिश्लोकौ ।

श्रीमतो भट्टमल्लाख्यान्निःसृतैषा कालानिधेः ।
विद्वच्चकोरैरास्वाद्या भवत्वाख्यातचन्द्रिका ॥ १ ॥
त्रयीमूर्तेर्भगवतः सम्प्रवृत्ता प्रसादतः ।
त्रैलोक्यचक्षुर्मतस्य तस्य प्रीत्यै प्रकल्पताम् ॥ २ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथमकाण्डः

॥ श्रीः ॥
॥ श्रीमते हयग्रीवाय नमः ॥
॥ नमः परमर्षिभ्यः ॥

भूवयादिप्रकृतये पुरुषत्रयमूर्तये ।
सदाख्यातपदायास्मै परस्मायात्मने नमः ॥ १ ॥
संस्मृत्य गुरुपादाब्जे भट्टमल्लेन रच्यते ।
व्युत्पित्सूनां प्रमोदार्थमेकार्थाख्यातपद्धतिः ॥ २ ॥

१. अथ भावविकारवर्गः ॥

(१) सत्तायामस्ति भवति विद्यते (२) चाथ जन्मनि ।
उत्पद्यते जायते च प्ररोहत्युद्भवत्यपि ॥ ३ ॥
(३) निवर्तते सम्भवति सिद्धौ सिध्यति राध्यति ।
निष्पद्यते च राध्नोति साध्नोति फलतीति च ॥ ४ ॥
(४) वर्तते तु वसत्यास्ते ध्रियते चावतिष्ठते ।
क्षियति स्थलति स्थित्यां मठत्यपि च तिष्ठति ॥ ६ ॥
(८) जीवे बलत्यूर्जयति श्वसित्यनिति जीवति ।
अन्यतेऽथ पाणिति च समनित्युदनित्यपि ॥ ६ ॥
व्यनित्यपानिति प्राणवृत्तिष्वाख्यातपञ्चकम् ।
(६) कुच्छ्रजीवे क्षञ्जयति कठत्यातङ्कति त्रयम् ॥ ७ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(७) परिणामे परिणमत्यात्मनेऽपि विवर्तते ।
सम्पद्यते कल्पते(८)ऽथ वृद्धौ बृहति वर्धते ॥ ८ ॥
आप्यायते स्फायते च श्वयत्यृध्नोति बर्हति ।
आपूर्यते पुष्यति च पोषत्यृध्यति पृ(पू)षति ॥ ९ ॥
वंहते मंहते मेध्यत्येधते च विपोलति ।
नीवत्यपि स्थूलयते तथा पीवति मीवति ॥ १० ॥
महीयते च वठति विपोलयति तीवति ।
क्रमते प्यायते स्फीतीभवति प्रथतेऽपि च ॥ ११ ॥
क्रम्यते प्रसते तौति तवीति च्छान्दसौ क्वचित् ।
(९) स्फुटति स्फोटते फुल्लत्युन्मीलत्यपि पुष्यति ॥१२॥
विजम्भते विकचते विकासे विकसत्यपि ।
(१०) मीलति स्मीलति क्ष्मीलत्येते सङ्कुचतीति च ॥ १३ ॥
कूणयत्यपि सङ्कोचे मुकुलीभवतीति षट् ।
(११) अथो जरायां जरति सप्त जीर्यति झीर्यति ॥ १४ ॥
जूर्यते जारयति च जिनाति च जृणाति च ।
(१२) दलति स्फोटति विशीर्यते फलति शीयते ।। १५ ।।
द्वाडतेऽमी विशरणे ध्राडते चाष्ट सीदति ।
(१३) अल्पत्वे लिश्यते कृश्यत्यमी ह्रसति चुण्डते ।। १६ ॥
चत्वारो(१४)ऽथ दरिद्राति व्यृधोति व्यृध्यतीत्यपि ।
दरिद्रत्वे त्रयो(१५)ऽथापक्षीयते चापि दीयते ॥१७॥
अपक्षये जायति चापक्षयत्यपि दस्यति ।
तस्यत्यपि क्षायति च सायतीति पदाष्टकम् ॥ १८ ॥
(१६) सप्त प्रध्वंसतेऽप्येति विनश्यति विलीयते ।
प्रलीयते विनाशेऽमी स्यू रिष्यति विपद्यते ॥ १९ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(१७) परैति प्रैति मरणे म्रियते च प्रमीयते ।
सन्तिष्ठते समाप्नोति विरमत्यारमत्यपि ॥ २० ॥
पर्यवस्यत्युपरमत्यात्मनेपदसंस्थितौ ।
(१८) निर्वाति निर्वायति विध्यायत्युद्वायतीति च ।। २१ ।।
उद्वाति शाम्यतीत्येते तेजसो विरतौ तु षट् ।
इति भावविकाराः षट् सभेदाः प्राय ईरिताः ॥२२॥

इति भावविकारवर्गः ॥ १ ॥

२. अथ बुद्धिवर्गः ॥

(१) स्फूर्तौ सत्ताविरस्त्याविर्भवति प्रादुरस्ति च ।।
प्रादुर्भवति निर्भाति स्फुरति प्रतिभासते ।। २३ ।।
(२) वेत्ति जानाति जानीते वेद बोधति बुध्यते ।
निबोधते चेतयते मन्यते प्रतिपद्यते ॥ २४ ॥
प्रेक्षते पण्डते प्रत्येत्यवगच्छति चेतति ।
मनुते चोपलभतेऽवैति वेदयतेऽञ्चति ।। २५ ।।
ज्ञाने * मानयते[1] संवेस्यात्मनेऽयमकर्मकः ।
गृह्णात्यपि च गृर्णीते चिकेत्ति च चिकेति च ।। २६ ।।
एतौ छन्दसि केषाञ्चित् ज्ञानार्थाः षट् च विंशतिः ।
धातू च नीवदी ज्ञानविषयौ स्तः क्वचिद्यथा ॥ २७ ॥
विद्यासु नयते प्राज्ञो वदते तासु पण्डितः ।
(३) चित्तेमनस्युरसितः करोति कुरुते परे[2] ॥ २८ ॥
मनसा गोचरीकारे (४) मनस्वित्वे मनस्यति ।।
(५) मेधायति तु मेधयां त्रयं मेदति मेदते ॥ २९ ॥
(६) विभ्राम्यति विपर्येति विपर्यस्यति विभ्रमे ।

[1] "गारयते" इति पाठान्तरम् ॥
[2] "पदे" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रमति भ्राम्यतीत्येते (७) विमतौ तु विमायति ॥ ३० ॥
विमन्यते विवदते तथा विप्रतिपद्यते ।
(८) संशये पञ्च सन्देग्धि सन्दिग्धे विचिकित्सति ॥ ३१ ॥
संशेते च विशेते च (९) वितर्कयति तूहते ।
मीमांसते स्यमयते वितर्के विमृशत्यपि ॥ ३२ ॥
विन्ते चोत्पश्यति परामृशत्युत्प्रेक्षते तथा ।
णावप्युपालोचते द्वौ पर्यालोचत इत्यमू ॥ ३३ ॥
विचारयति सम्पृच्छत्यात्मनेऽयमकर्मकः ।।
सम्प्रधारयतीत्येते समर्थयत इत्यपि ॥ ३४ ॥
(१०) शङ्कायां रगतीति स्याद्रेकते शङ्कते त्रयम् ।।
(११) सम्भावयति तुल्यार्थाववकल्पयतीत्यमू ॥ ३५ ।।
(१२) विस्रम्भते तु प्रत्येति विश्वसित्याश्वसित्यपि ।
श्रद्धत्ते श्रद्दधातीति विश्वासे प्रश्वसित्यपि ।। ३६ ।।
(१३) विवेके तु विवेषेक्ति विविनक्त्यात्मनेऽप्यमू ।।
(१४) निश्चिनुते निर्णयते निर्णयति च निर्णयेऽध्यवस्यति च।।३।।
निष्टङ्कयति च सप्त च निर्धारयतीह निश्चिनोति स्युः ।
(१६) सङ्कल्पयति सङ्कल्पेऽभिसन्धत उदीक्षते ॥ ३८ ॥
(१६) लक्षीकरोत्युद्दिशति चोद्देशेऽपदिशत्यपि ।
साक्षात्करोत्यात्मनेऽपि प्रत्यक्षेऽध्यक्षयत्यापि ।। ३९ ।।
साक्षयत्यपि चाध्यक्षीकरोत्यनुभवत्यपि ।
(१७) मिमीते मीयते माति मिनोति मिनुते मितौ ।। ४० ।।
प्रमानुमोपमासु स्युः प्रान्युपादीन्यनुक्रमात् ।
(१८) ध्याने चिन्तयति ध्यायत्यमी भावयति त्रयः ॥४१॥
(१९) स्मरणे त्वभिजानाति स्मरत्यध्येति च त्रयम् ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(२०) प्रतिजानाति चेत्कण्ठत्युत्कण्ठयति मण्ठते ।। ४ ।।
उत्कण्ठते चोत्कण्ठायामाध्यायत्युन्मनायते ।
(२१) दैवं पर्यालोचयतीत्यर्थे राध्यति चेक्षते ।। ४३ ।।
(२२) प्रत्यभिजानात्यभिसन्धत्तेऽप्यनुसन्दधाति समाः ।
प्रतिसन्धत्ते प्रत्यवमृति प्रतिसन्दधातीति ॥ ४४ ।।
(२३) विस्मृत्यां विस्मरति च स्फूर्छति प्रस्मरत्यपि ।
(२४) मोहे विचेतीभवति विमुह्यति च मूर्छति ।। ४५ ।।
युप्यत्यष्टौ विलुभति रुप्यत्यृच्छति लुप्यति ।
(१६) प्रयुच्छति संस्रति चानवधाने प्रमाद्यति ।। ४६ ।।
विमनीभवतीति स्युः पञ्चामी विमनायते ।
(२६) समादधात्यवदधात्यमी प्रणिदधाति च ॥ ४७ ।।
आत्मनेऽपि त्रयं शीलत्यवधाने(२७)ऽथ संश्रवे ।
आशृणोति प्रतिशृणोत्यभ्युपैत्यभ्युपेयते ।। ४८ ॥
अतिष्ठतेऽवगिरते प्रतिजानीत इत्यपि ।।
सङ्गिरते संशृणोतीत्यात्मनेऽयमकर्मकः ।। ४९ ॥
समादधात्यात्मनेऽपि मुणत्यभ्युपगच्छति ।
(२८) उरर्यङ्ग्यूर्युररीभ्यः करोति कुरुते * परे[3] ॥ ५० ॥
प्रसौत्यभ्यनुजानाति प्रसवत्यनुमन्यते ।।
शूषति स्मानुमनुतेऽप्यनुज्ञाया(२९)मथेक्षणे ।। ५१ ॥
निर्वर्णयति निध्यायत्यालोकयति पश्यति ।
आलोकते लक्षयते निभालयत ईक्षते ।। ५२ ।।
निरूपयत्यपि निशामयते च विचायति ।
निबुन्दत्यात्मनेऽपि द्वौ लक्षयत्यपि लोचते ।। ५३ ।।

[3]"पदे" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

चष्टे छन्दसि सम्पश्यत्यात्मने स्यादकर्मकः ।

(३०) शृणोत्याकर्णयति च तद्वन्निशमयत्यपि ॥ ५४ ॥

निशाम्यतीति श्रवणे (३१) घ्राणे[4] जिघ्रति शिङ्घति ।

(३२) स्पृशत्यामृशति स्पर्शे छुपत्यालभते च षट् ।। ५५ ।।

स्पशति स्पशते (३३) लेढि वास्वादे रसयत्यापि ।

लागयत्यास्वादयति लीडे राकयतीति षट् ॥ ५६ ।।

इति बुद्धिवर्गः ॥ २ ॥

३. अथ अन्तःकरणवृत्तिवर्गः ।।

(१) लषते लष्यति लषत्याशास्ते माक्षतीप्सति ।

आकाङ्क्षति स्पृहयति नाथते वष्टि वाञ्छति ।। ५७ ।।

आशंसते कामयते लष्यते वाङ्क्षतीच्छति ।

लिप्सते हर्यतीच्छायां खटत्यप्यनुरुध्यते ॥ ५८ ॥

विंशतिः स्यु(२)र्भ्रूणयते त्वपि लुभ्यति गृध्यति ।

ककते चार्थयति[5] च गार्ध्ये षट् स्युर्धनायति ॥ ५९ ।।

(३) क्रमते क्रम्यते यस्यत्युद्युङ्क्ते चोत्सहत्यपि ।

आराधयत्युत्सहत एषते संयसत्यपि ।। ६० ।।

यसत्यपि प्रयतते संयस्यति च जेहते ।

वेहते पोडशोत्साहे वाहतेऽमी व्यवस्यति ।। ६१ ।।

(४) विप्रीयतेऽपरजति द्वेष्टि द्वेषेऽपरज्यति ।

विरुणद्धि विगृह्णाति पञ्चामी चात्मनेपदे ।। ६२ ।।

वैरायते स्पर्धते च (५) विराधोत्यभ्यसूयति ।

सूर्क्ष्यतीक्ष्यति चेर्ष्यायामीर्ष्यत्यपि च भत्स्यते ।। ६३ ।।

(६) मोदते ह्लादते माद्यत्यानन्दति च तुष्यति ।

[4] "धातौ" इति राघवनैषधीय १।४ श्लोकव्याख्याने पाठः ॥

[5] "गर्दयति च" इति पाठान्तरम् ॥

CC-0. Ravindra Kalidas Sanskrit University Ramtek Collection

हृष्यति प्रीयते निर्वात्यपि नन्दति तुषते ।। १४ ।।
निर्वृणोत्यात्मने सुख्यत्येते प्रीतौ सुखायते ।
प्रचेतीभवतीत्येवं प्रमनीभवतीति च ।। ६५ ।।
सुमनायत इत्येवं सुमनीभवतीत्यपि ।
(७) ह्रियां ह्रीच्छति जिह्रेति लजते च ह्रणीयते ।। ६६ ।।
व्रीड्यति त्रपते मन्दाक्षयत्यप्यष्ट लज्जते ।।
(८) बिभेति त्रस्यति दरत्येवं त्रसति भेषते ।। ६७ ।।
विनक्ति भ्यसते चैव दर्भयत्यपि दर्भति ।
भेषत्युद्विजते भीत्या व्यथते द्वादशेरिताः ।। ६८ ।।
(९) तितिक्षतेऽधिकुरुते क्षान्तौ सहति सह्यति ।
मृष्यतीदं मर्षति चेत्यात्मनेऽपि चतुष्टयम् ॥ ६९ ।।
क्षाम्यत्येवं[6] क्षामयति क्षमते परिमृष्यति ।
तथा मर्षयति क्षम्पयति साहयतीति च ॥ ७० ॥
(१०) अवधीरयति यातयत्यवजानाति हेडते ।
विमानयत्यट्टयति सुट्टयत्यवमन्यते ॥ ७१ ॥
होडते हिण्डते रौडत्येते शेटति सेटति ।
करोत्यधस्तिरोभ्यां चात्मनेऽवगणयत्यपि ॥ ७२ ॥
अनादरे स्मायत्यते तथा परिभवत्यपि ।
मङ्गते त्वात्मने विप्रकरोति निकरोति च ॥ ७३ ॥
त्रयोऽतिसन्दधात्येते (११) विचति च्छलयत्यापि ।
प्रलोभयत्यपि शठत्युल्लापयत इत्यपि ।। ७४ ।।
दभ्नोति विप्रलभते प्रतारयति वञ्चने ।
अमी वञ्चयते गर्धयति (१२) चाथ जिघांसने ॥ ७५ ॥
जिघांसति द्रुह्यति चापराध्नोत्यपराध्यति ।

[6] "शाम्यत्येवं शीकयति" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपराध्यत्यपकरोत्ये तेऽपकुरुतेऽपि च ॥ ७६ ॥
चिरिणोति रिणोत्येवं क्षिणोति जिरिणोति च ।
दाश्नोति च दृणोत्याहुः पदानि च्छान्दसानि षट् ॥ ७७॥

(१३) कुप्यति क्रुध्यति क्रोधे भामते भामयत्यपि ।
चण्डते रोषयति च मन्तूयति च रुष्यति ॥ ७८ ॥
गुनात्येवं संरभतेऽथागृह्णात्यात्मनेऽप्यदः ।।
आग्रहेऽभिनिविशते (१४) कृपायां करुणायते ॥ ७९ ॥
कृपायते चानुकम्पतेऽनुक्रोशत्यृतीयते ।
घृणायते च दयते क्रपतेऽभ्युपपद्यते ।। ८० ॥
प्रसीदत्यनुह्णाति चात्मनेऽयं (१९) विषीदति ।
शोचतीति च शोके द्वे (१६) त्रयोऽनुशयवाचिनः ॥८१॥
अनुशेतेऽनुतपति स्युर्विप्रतिसरत्यमी ।।

(१७) कन्दति क्रन्दति क्लन्दत्यस्त्रयत्यपि रोदिति ॥ ८२ ॥
बाष्पायते विलपति तेवते परिदेवते ।
क्रोशति क्लिन्दते क्लिन्दत्येते द्वादश रोदने ॥ ८३ ॥

(१८) अनुरज्यत्यनुरजत्यात्मने मिन्दयत्ययम् ।।

(१९) मेद्यति स्निह्यति स्नेहे प्रीयते सप्त मेदते ॥ ८४ ।।
गर्वेऽभिमन्यते गर्वयते कर्वति खर्वति ।
हृष्यति स्माभिमनुते गर्वयुद्धति दृप्यति ।। ८५॥
क्षीबते शौटति कडत्यपि हर्षति कण्डते ।
माद्यत्यहङ्करोत्यात्मने(२०)ऽप्युन्मादे तु लोडति ॥ ८६ ।।
म्लेटत्युन्माद्यति म्रेडत्येते लेट्यति लोट्यति ।

(२१) ताम्यति श्राम्यति ग्लानौ खिन्ते खिन्दति खिद्यते ।।८७।।
ग्लायति क्लाम्यति परिम्लायति क्लापतीति च ।
निर्विद्यते चापति च ग्लपति(२२)ऽप्यथ दूयते ॥ ८८ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्लिश्यते व्यथते तन्तस्यति पम्पस्यतीति च ।
दुःखायते दुःख्यति च दुःखे कृच्छ्रायतेऽष्टकम् ॥ ८९ ।।

(२३) बीभत्सते च बीभत्से जुगुप्सत ऋतीयते ।।

(२४) प्रमौलतीति तन्द्रायां स्याद्घूर्णते प्रचलायते ॥ ९० ।।

(२५) जम्भते जुम्भते चापि जृम्भे जञ्जभ्यते त्रयम् ।

(२६) शेते द्रायति निद्राति संसस्ति स्वपितीति च ।। ९१ ॥
निद्रायते संविशति निद्रायां संस्ति मन्दते ।।

(२७) वलते परिवृत्तौ स्याङ्घोटते परिवर्तते ।। ९२ ॥

(२८) प्रबुध्यते च जागर्ति द्राहते जागरे त्रयम् ।।

इत्यन्तःकरणवृत्तिवर्गः ॥ १ ॥

४. अथ वाक्क्रियावर्गः ॥

(१) आचष्टे वक्ति वदति रपत्याख्याति भाषते ।।
ब्रूतेऽभिधत्ते गदति व्याहरत्यपि जल्पति ॥ ९३ ।।
ब्रवीत्यभिदधाति व्याहरते कथयत्यपि ।
गृणात्युदीरयत्युक्तौ कीर्तयत्यालपत्यपि ।। ९४ ।।
भणत्यपि वचत्येके वाचयत्यपि शंसति ।

(२) पठत्यधीतेऽध्ययने चर्चयत्यपि चर्चति ॥ ९५ ॥
आमनत्युपयुङ्क्ते च गमयत्यपि शिक्षते ।।

(३) शिक्षणेऽध्यापयति च शिक्षयत्यनुशास्ति च ॥ ९६ ॥

(४) वेदमाचष्ट इत्यर्थे वेदापयति सम्मतम् ।

(५) संस्तौत्यभ्यस्यति परिचिनोतीत्यात्मनेऽप्यमी ।। ९७ ॥
स्युः शीलयति च गुणयत्याम्रेडयति शीलने !

(६) सत्यापयति सत्योक्तौ (७) कुन्द्रयत्यनृतोदिते ॥ ९८ ॥

(८) असम्यगुक्तौ शठयत्येवं श्वठयति द्वयम् ।

(९) अपशब्दयति म्लेच्छयत्यपभ्रंशयतीत्यपि ।। ९९ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्लेच्छयत्यपशब्दे स्युरपभाषत इत्यमी ।।

(१०) स्खलति भ्रेषति भ्लेषत्यन्यत्वेऽन्यथयत्यपि ।। १०० ॥

(११) मिथ्याकारयते त्वेतदन्यथात्वेऽसकृत्कृते ।।

(१२) शपते शप्यति शपत्याक्रोशत्यपि शप्यते ।। १०१ ॥

बेटत्याक्रोशनेऽमी षड(१३)थ मिथ्याभिशंसने ।

अभ्याख्यात्यप्यभिशपत्यभ्याचष्टेऽभिशंसति ।। १०२ ॥

(१४) जुगुप्सते वाचयति प्रवदत्यपि गर्हते ।

त्रयः क्षिपत्यात्मनेऽपि चोपक्रोशति निन्दति ॥ १०३ ॥

निसः परेश्च वदति गल्हत्यपि च गल्हते ।

निन्दायां स्युः कुत्सयते क्षिपत्यपकरोत्यमी ।। १०४ ॥

(१५) भर्त्सयते तर्जयते सन्तर्जति लजति लाजति च ।

लञ्जति लाञ्जति तुल्याः तर्जयति च दृश्यते कविषु ।।१०५।।

(१६) प्रतिभिन्ते प्रतिभिनयुपालभत इत्यपि ।

उपालम्भे (१७) सनिन्दे तु परिभापत इत्यदः ।।१०६।।

(१८) स्तौति स्तुते नुवति नौति पनायतीट्टे

स्तुत्यामृचत्यपि पणायति च स्तवीति ।

स्युर्वन्दतेऽर्कयति चेड यति प्रशंस-

त्येतानि पञ्चदश दीव्यति मन्दते च ।। १०७ ।।

(१९) कत्थते स्तोमपति च श्लाघत शाडतेऽपि च ।

शीभते शुल्भते शाठयते स्युः सप्त कत्थने ॥१०८॥

(२०) कबते वर्णयति च कवित्वे कवयत्यपि ।

(२१) उप श्लोकयतीत्येतच्छ्लोकोपस्तवनार्थकम् ।। १०९ ॥

(२२) यज्ञेषु शंसतीत्यृग्भिः (२३) स्तुते स्तौतीति सामभिः ।।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(२४) शास्त्रे प्रतिगृणातीति[7] प्रोत्साहेऽनुगृणाति च ॥ ११० ॥

(२५) स्यात्प्रत्यभिवदत्याशीर्वाद अशास्त इत्यपि ।

(२६) निबध्नाति ग्रन्थति च ग्रथ्नाति श्रन्थयत्यपि ।। १११ ॥

श्रथ्नाति वटयत्येवं पटपत्यपि गुम्फति ।

गुफत्येकादश ग्रन्थे दृभति ग्रन्थयत्यपि ।। ११२ ।।

(२७) समाहरति सङ्क्षेपे सङ्गृह्णाति समस्यति ।

सङ्क्षिपत्यात्मनेऽप्येते सङ्क्षिप्यति तनक्ति च ॥ ११३ ॥

यन्त्रयत्यपि सङ्क्षिप्तावष्ट कूणयतेऽप्यमी ।

(२८) विस्तृणोति व्यस्यति च विस्तृणात्यातनोति च ।। ११४ ॥

चत्वारस्त्वतिविस्तारे (२९) पञ्चते पञ्चयत्यपि ।

व्याकरोति व्याकुरुते व्याचष्टेऽर्थापयत्यपि ॥ ११६ ॥

व्याख्याति स्पष्टयति च व्यनक्ति व्यञ्जयत्यपि ।

करोति प्रादुराविर्भ्यां विवृणोत्यात्मनेऽप्ययम् ॥ ११६ ।।

प्रकाशने प्रकथयत्येते लक्षयतीत्यपि ।

तिष्ठते घोषयति च विशब्दयति घोषति ।। ११७ ।।

(३०) आकारयत्याह्वति हूतौ निह्वयते त्रयम् ।।

(३१) स्यात्संहूतौ संहयते (३२) स्पर्धया हयते हवे ॥ ११८ ॥

(३३) अनुयुङ्क्ते प्रश्नयति प्रश्ने ज्ञीप्सति पृच्छति ।

(३४) आपृच्छते तु यात्रार्थे (३५) विप्रश्ने राध्यतीक्षते ॥ ११९ ॥

(३६) अभिमुख्येन वचने प्रवदत्यभिवक्ति च ।

प्रतिवक्त्युत्तरयति प्रत्याहेत्यादयोऽपि च ॥ १२० ॥

(१७) अपह्नुतेऽपजानीते निह्नुतेऽपलपत्यमी ।

अपह्नवे (३८) निराचष्टे प्रत्याचष्टे निरस्यति ॥ १२१ ॥

[7]शास्त्रे शास्त्रसम्बन्धिनि, प्रोत्साहे इत्यस्य विशेषणमेतत् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्यादिशत्यपनयत्यपोहति परास्यति ।
पराणुदति चापास्यत्यात्मने स्युर्व्युदस्यति ॥ १२१ ॥
नवैतेऽपाकरोतीति प्रत्याख्याति निराकृतौ ।
पराकरोत्योणति च दूषयत्यपि लुञ्चति ॥ १२३ ॥
(२९) उपमन्त्रयते चोपवदते सान्त्वयत्यपि ।
चपत्युपच्छन्दयति सामयत्यपि सान्त्वने ॥ १२४ ॥
सप्तानुनयतीत्येतदात्मनेऽप्य(४०)थ सूचने ।
सूचयत्यप्युत्कुरुते त्रयः पिशुनयत्यमी ॥ १२५ ॥

इति वाक्क्रियावर्गः ॥ ४ ॥

५. अथ ध्वनिक्रियावर्गः ॥

(१) ह्रादते नर्दति नदत्यपि गर्जति गुञ्जति ।।
कुजति क्षीजति गुजत्यपि गजति गृञ्जति ।। १२६ ॥
रेभते शिञ्जति रणत्येवं व्रणति मुञ्चति ।
अम्बते लम्बते वेटत्यणति क्वणतीति च ॥ १२७ ।।
शब्दायते कणति च रौति भ्रणति रासते ।
वणति ध्रणति ह्रादते च ध्वनति नासते ।। १३८ ।।
कलते कौति वनति ध्वनयत्यपि मोजति ।
कवते तोसति रसत्यपि ह्रसति रायति ।। १२९ ।।
गवते घोषति रवीत्यपि स्यमति कायति । ।
वते घवते क्रूयतेऽवते स्वनतीति च ।। ११० ॥
रम्भते खवते गर्जयत्येते शब्दवाचिनः ।
(२) भषते बुक्कयति च बुक्कतीति शुनां ध्वनौ ।। १३१ ।।
(३) रिणाति रेपते वार्के (४) तिरश्चां वाश्यते ध्वनौ ।
(५) द्राङ्क्षति ध्राङ्क्षति ध्वाङ्क्षत्येते स्युर्घोरवाशिते ॥ १३२ ।।
(६) घुरत्यार्ते च कुरति (७) तारे कोचति निःस्वने ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(८) हेषते ह्रेषतेऽश्वानां (९) हस्तिनां बृंहतीति च ।। १३३ ।।

(१०) जीमूतानां स्तनयति गदयत्यपि गर्जति ।

(११) स्फूर्जत्यशनिनिर्घोष (१२) उत्कण्ठास्वन अनुते ।। १३४ ।।

(१३) उच्चचंति च सङ्क्रीडेत्यते शकटकूजने ।

(१४) हिकते हिक्कतीत्येतौ हिक्कायां (१५) क्षौति तु क्षुते ।। १३५ ।।

(१६) कासते कफजे शब्दे (१७) सौरते मणतीत्यदः ।

(१८) कौक्षे कर्दत्य(१९)पानोत्थे पर्दते शर्धते पदे ॥ १३६ ।।

(२०) चीत्करोति टङ्करोति[8] करिकार्मुकयोः क्रमात् ।

द्वावात्मनेऽपि (२१) भूषादेः शिङ्के (२२) गीते तु गायति ॥ ३७॥

(२३) उपवीणयतीत्येतदुपगाने हि वीणया ।। १३८ ।।

इति ध्वनिक्रियावर्गः ॥ ५ ॥

अत्र भावविकाराणां धियामिच्छादिकर्मणाम् ।

वाचा तत्सङ्गतानां च पर्यायाः प्राय इरिताः ॥ १३९ ।।

इति प्रथमकाण्डः ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

[8] "क्रेङ्करोति" इति पाठान्तरम् ॥

अथ द्वितीयकाण्डः ।

अथोच्यन्ते नृविप्रादिचेष्टा वर्गैः समासतः ।

प्रसङ्गसङ्गताश्चान्याः पर्यायैस्तिङ्वदात्मकैः ॥ १ ॥

१. अथ मनुष्यचेष्टावर्गः ॥

(१) प्रक्रम्यते प्रारभते पस्तौत्युद्घातयत्यपि ।

प्रस्तुते चोपक्रमते दशोपक्रम्यतेऽप्यमी ॥ २ ॥

अभ्यादते प्रक्रमते उपजानात्युपक्रमे ।

(२) कृतौ करोत्यावहति विदधात्यादधाति[9] च ।। ३ ।।

वितनोत्यात्मने पञ्च (३) सृजत्युत्पादयत्यपि ।

निर्मिमीते भावयति निर्माति रचयत्यपि ॥ ४ ॥

निष्पादयति निर्वतयति साधयतीति च ।

(४) अनुतिष्ठत्याचरति श्रद्धायुक्तेऽनुसृज्यते ॥ ५ ॥

(५) उत्तिष्ठते तु घटते चेष्टते त्रन्दतीहते ।।

व्यायच्छते व्याप्रियते चेष्टनेऽष्टौ प्रवर्तते ॥ ६ ॥

(६) विडुत्सर्गे तु गुवति हदते(७)ऽथावमेहति ।

मूत्रणे मूत्रयति च प्रस्त्रवत्यपि च त्रयम् ।। ७ ॥

(८) उद्वर्तयति चोत्सादयत्युत्सीदति तत्समम् ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

9* "विदधात्यादधात्यपि" इति राघवनैषधीये १। १२३ श्लोकव्याख्याने पाठः ॥

(९)　वस्ते प्रोर्णौति संवस्त्रयति प्रोर्णोति चेलति ॥ ८ ॥
परिधत्ते परिदधात्याच्छादे प्रोर्णुतेऽष्टकम् ।
(१०)　अनुलिम्पति चर्चायां दिग्धे देग्ध्यनुलिम्पते ॥ ९ ॥
चर्चत्येवं चर्चयति षड(११)थो भृषणार्थकाः ।
मण्डति मण्डपति च भूषयत्यपि भूषति ।। १० ॥
परिष्करोत्यात्मनेऽलङ्करोति द्वे च मङ्कते ।
प्रसाधयत्य(१२)थोत्तंसत्यवतंसेऽवतंसति ॥ ११ ॥
(१३)　प्रतिमुञ्चत्यपिनह्य त्यामुञ्चति पिनयति ।।
भुषाद्यामोचने चत्वायूँहनीयानि चात्मने ।। १२ ।।
(१४)　चकास्ति भासते भाति द्योतते रोचतेऽसति ।
राजति त्वेषति घृणोत्यात्मनेऽपि चतुष्टयम् ॥ १३ ॥
भ्राजते शुम्भति शुभत्येजते शोभतीति च ।
प्रकाशते भ्राशते च लाशते श्यन्यपि द्वयम् ॥ १४ ॥
भ्रेजते दीव्यति ह्रटत्यमी ज्वलति जोतते ।
वर्चते दीप्यते दीप्तौ कनत्युल्लसतीति च ।। १५ ।।
केचिज्जिघर्ति दीधीते बभस्ति छान्दसान्विदुः ।
कञ्चते योतते मन्दतेऽमी द्वात्रिंशदीरिताः ।। १६ ।।
(१५)　नटत्यमी नाटयति नृत्ते नृत्यत्य(१६)थो हसे ।
जक्षिति कक्खति तकति प्रहसति कखति घघति स्मयते १७
(१७)　क्रीडति दीव्यति खेलति केलति विहरति च कूर्दते लमति ।
रमतेऽमी विहरते कुपारयति खूर्दते ॥ १८ ।।
केलायति ललत्येलायति खेलायतीति च ।
आङोऽनुसम्परिभ्यश्च क्रीडते क्रीडनार्थकाः ।। १९ ॥
(१८)　हिलति स्याद्भावकृतौ त्रयं चुड्डति चुल्लति ।।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(१९) विडम्बयत्यनुकरोत्यात्मनेऽनुहरत्यदः ॥ २० ।।

अनुकारे (२०) रिङ्गणे तु रिङ्गति स्खलति द्वयम् ।

(२१) भण्डते स्फुण्डयति च केलो परिहसत्यपि ॥ २१ ।।

(२२) कुत्सिते स्मयने प्रोक्तं तङ् वा कुस्मयते पदम् ।।

(२३) तर्षे वृष्यत्यमी धित्सत्युदन्यति पिपासति ।। २२ ।।

(२४) पिबत्याचामति धयत्यपि चूषति पीयते ।।

पाने(२५)ऽथ क्षुध्यति क्षुध्यशनायात जिघत्सति ।।२३।।

(२६) जेमत्यश्नाति जमति भक्षयत्यपि खादति ।

चरति प्साति झमति भुङ्क्ते चमति चर्वति ॥ २४ ॥

वल्भते घसति क्वापि छमति प्रत्यवस्यति ।

चषत्यप्यभ्यवहरत्ये ते तर्णोति भक्षति ॥ २५ ॥

तृणोति चात्मने पश्चाप्युपभुङ्क्ते च जक्षिति ।।

वेति भुक्तौ विष्वणति चावष्वणति सध्वनौ ॥ २६ ॥

(२७) ग्रसते ग्लसते गीर्णौ गिरत्येते गिलत्यपि ।

(२८) गर्हितायां निजागर्ति निजोगल्यत इत्यपि ॥ २७ ॥

(२९) दन्दश्यते दन्दशीति दन्दष्ट्यपि च खर्दति ।

गर्ह्ये दंशे(३०)ऽथ दशति शुद्धे दंशयति द्वयम् ॥ २८ ॥

(३१) वान्तौ वमत्युद्भिरति स्नुह्यत्युद्गिलतीत्यमी ।

(३२) निष्ठीव्यति ष्ठीव्यति च निष्ठीवति च थूत्कृतौ २९ ॥

(३३) शेषे परिशिनष्टीति शेषयत्यपि शेषति ।

(३४) तृप्यत्येते मादयते तृप्तौ भ्रायति तृम्फति ॥ ३० ॥

तृप्नोत्येके छन्दसीदं तृपत्येवं चकत्यपि ।

(३५) विश्राम्यतीति विश्रान्त क्वचिद्विश्रमते मतम् ।। ३१ ।।

(३६) स्युरास्ते तूपविशति निषीदत्युपवेशने ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(३७) ऊर्धीभवति तूत्तिष्ठत्यूर्ध्वत्वे तिष्ठतीत्यपि ॥ ३२ ।।

(३८) आदाने कोकते लाति गर्हते ग्लहते क्वचित् ।
वर्कते घिण्णते गृहत्येवं झषति चीवति ।। ३३ ।।
स्वीकरोतीति चत्वारि चात्मने स्युः प्रतीच्छति ।
घुण्णतेऽमी गृह्यते घृण्णते स्युश्चतुर्दश ॥ ३४ ॥

(३९) रहति त्यजति त्यागे जहान्युज्झति बुस्यति ।।
विसृजत्युत्सृजति च मुञ्चते मुञ्चतीति च ।। ३५ ॥
विष्यत्यवस्यति रहयति मोक्षयतीत्यपि ।
मोचयत्यूनयति चोत्सृज्यते हापयत्यमी ।। ३६ ।।

(४०) वृणक्ति वर्जयति च वृङ्क्ते युङ्क्ते जुङ्क्ते ।
वर्जने राखति प्रत्याचष्टे वर्जति बुङ्क्ते ॥ ३७ ।।
व्यासेधति निषेधत्यात्मने परिहरत्यपि ।

(४१) अथ व्रीणाति वरति वृणाति च वृणोति च ।। ३८ ।।।
त्रीण्यात्मनेऽपि वरणे वारयत्यपि वृक्षते ।
वावृत्यते कीटयति वायते चापि वृश्यते ।। ३९ ।।

(४२) करोति हस्तेपाणिभ्यां कुरुते चोपयच्छते ।
विवहत्युद्वहति चोद्वाहे परिणयत्यपि ।। ४० ।।
चत्वारि वात्मने (४३) ज्येष्ठेऽनूढेऽत्र परिविन्दति ।

(४४) परिष्वजत अश्लिष्यत्यालिङ्गत्युपगूहति ।। ४१ ॥
क्रोडीकरोत्यात्मने द्वावङ्कपालयतीति च ।
आलिङ्गने सप्त परिरभतेऽप्य(४५)थ कामने ।। ४२ ।।
रिरंसते कामयते यियप्सति (४६) वृषस्यति ।
अन्यस्त्री चे(४७)दथाश्वा चेदश्वस्यत्य(४८)थ चुम्वने ॥४३।।
निक्षति चुम्बति निंस्ते (४९) व्यवैति मिथुनीभवत्यापि च ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

यभति च भजतीत्येते निधुवति संविशति मैथुनेऽमी स्युः ॥ ४४ ॥

(५०) उपभुङ्क्ते तूपभोगे सम्भुङ्क्ते निर्विशत्यपि ।

(५१) शूलत्यामयतीत्येते रुजत्यपि रुजि त्रयम् ॥ ४५ ॥

(५२) प्रसूयते प्रसूते च गर्भमोक्षे विजायते ।।

प्रजायते जनयति जजन्ति छान्दसं विदुः ।। ४६ ॥

(५३) उल्लाघयति भैषज्ये भिषज्यति चिकित्सति ।

उपक्रमत इत्येतच्छाम्यत्युपरमत्यमी ॥ ४७ ॥

इति मनुष्यचेष्टावर्गः ॥ १ ॥

२. अथ ब्रह्मचेष्टावर्गः ॥

(१) प्रक्षालयति पल्पूलयति शोधयतीत्यमी ।।

निर्णेनेक्ति पुनातीति धावत्यप्यात्मने त्रयम् ॥ ४८ ॥

निङ्क्ते मार्ष्टि च शौचे स्युर्मार्जयत्यपि मार्जति ।।

(२) मज्जत्याप्लवते स्नाति स्नायत्येतेऽवगाहते ॥ ४९ ॥

स्युर्मज्जने क्रुडत्येते (३) शुन्धयत्यपि शुन्धति ।।

शुन्धते शुध्यति शुचीभावे स्युरवदायति ॥ ५० ॥

(४) उपस्पृशति चाचामत्यमू आचमनार्थके।

(५) अभिवादयते नमति प्रणतावभिवन्दते नमस्यति च ।। ५१ ॥

उपसङ्गृह्णात्युपसङ्गृह्णीते प्रणिपतति नमस्कुरुते ।

(६) अथार्चत्यञ्चति भजत्यपचायति चात्मने ।। ६२ ।।

चत्वारि वल्गूयति च सभाजयति मानति ।

सपर्यत्यचंयति चाराध्नोति महयत्यपि ॥ ५३ ।।

पूजयत्यर्हयति च महत्याराधयत्यपि ।

मानयत्यञ्चयति चार्हति यक्षयतेऽर्चने ।। ५४ ॥

(७) सम्मन्यते त्वाद्रियते सम्भावयति सूर्क्षति ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्करोत्यादरेऽपि स्यु(८)रुपास्तौ वरिवस्यति ॥ ५५ ॥
शुश्रूषते परिचरत्युपास्ते च द्रवस्यति ।
(९) यजति त्रिदशार्चायां यजते चोपतिष्ठते ।। ६६ ।।
(१०) भिष्णज्यत्युपसेवायां लाडयत्युपसेवते ।।
वासयत्यपि संवाहयति विश्रमयत्यपि ।। ६७ ।।
(११) ददाति निर्वपति च दधात्यपि च दाशति ।
सनोति दासात दिशत्यात्मने सप्त यच्छति ।। ५८ ।।
अपवर्जयति स्पर्शयति विश्राणयत्यपि ।
वितरत्यर्पयति च चणत्यतिसृजत्यपि ॥ ५९॥
ददते राति शणति प्रतिपादयतीति च ।।
दाने विलभते भ्राजयति श्रणति लाति च ।। ६० ॥
(१२) स्वधाकरोत्यात्मने द्वौ पितृभ्यो निर्वपत्यपि ।।
(१३) विक्षिपत्यात्मनेऽपि स्याद्विक्षेपे विकिरत्यपि ॥ ६१ ॥
(१४) प्रक्षिप्यति प्रक्षिपति मिनोत्यप्यात्मने द्वयम् ।।
प्रक्षेपे पर्थयति च (१५) हविर्दाने जुहोत्यदः ।। ३२ ॥
स्वाहावौषड्वषड्भ्यश्च करोति कुरुते पदे ।
(१६) मीणाति प्रयति द्वावग्यात्मनेऽवति तर्पति ।। ६३ ।।
पृणाति प्रीणयति च जिन्वत्यपि च हिन्वति ।
धिनोति धिन्वति भ्रायतात्यादीनि च तर्पणे ।। ६४ ।।
(१७) केतयत्यामन्त्रयते निमन्त्रयत इत्यपि ।
आमन्त्रणे ग्रामयति कुणयत्यपि पञ्चकम् ।। ६५ ।।
(१८) धापयत्यात्मनेऽपि द्वौ धापने पाययत्यमू ।।
चूषयत्यादयोऽप्यत्र स्यु(१९)रथो परिवेषणे ।। ६६ ।।
परिवेवेष्टि परिवेविष्टे यामयति त्रयम् ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(२०) आदयत्यात्मनेऽप्येतद्भोजयत्यादि भोजने ।। ६७ ॥

(२१) पृणाति पूरयति च पिपर्ति प्राति पुर्वति ।
पारयत्युम्भति तथा पर्वत्युभति मर्वति ॥ ६८ ।।
तूणयत्याप्याययति पूरणे स्युभृणाति च ।।

(२२) आह्लादते मृडति च मृणाति सुखयत्यपि ।। ६९ ॥
पृडत्येवं मदयति मृडयत्यादि तोषणे ।

(२३) इज्यारम्भे दीक्षते च (२४) जपतीति जपे तथा ।। ७० ॥

(२५) जञ्जप्यते तु जञ्जप्ति कुत्सिते जञ्जपीति च ।

(२६) अभुक्तौ तूपवसति लङ्घते व्रतयत्यपि ॥ ७१ ।।

(२७) तपस्यति श्राम्यति च तप्यते च तपःकृतौ ।

(२८) मुण्डति मुण्डयति चे मौण्ड्ये वापयतीति च ॥ ७२ ॥
मद्राकरोत्यात्मनेऽपि द्वयं भद्राकरोति च ।

(२९) उपेक्षत उदास्ते च पदे माध्यस्थ्यवाचिनी ॥ ७३ ।।

(३०) स्युर्विरज्यत्युपरमत्यात्मने विरमत्यमी ।
उपशाम्यति वैराग्ये मोक्षते च मुमुक्षते ॥ ७४ ॥

(३१) परिव्रजति सन्न्यासे सन्न्यस्यत्यात्मनेऽप्यदः ।

(३२) ब्रह्मीभवति कैवल्ये मुच्यते चापवृज्यते ॥ ७५ ॥

इति ब्रह्मचेष्टावर्गः ॥ २ ॥

३. अथ क्षत्रियचेष्टावर्गः ॥

(१) ऐश्वर्य इन्दति नाथति सुरत्यपि नाधते ।
तप्यते तपतीत्येके सुवतीष्टे च सौति च ॥ ७६ ॥

(२) भुनक्ति पाति दयते गोपायति पिपर्ति च ।
रक्षति त्रायते त्राणे पालयत्यपि तेजति ॥ ७७ ॥
स्पृणाति कुण्डयति च गुण्डत्यवति जंसति ।

(३) शास्ति शिष्टो दण्डयति शिक्षयत्यपि दाम्यति ॥ ७८ ॥

CC0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(४) आवर्जयति वशयत्यपि राधयतीति च ।
वशीकरोति सङ्गृह्णात्यात्मने द्वौ वशीकृतौ ॥ ७९ ॥

(५) परिक्रीणीत इत्येतदुत्कोचादिवशीकृतौ ।

(६) आयत्तौ स्यादायतते वशीभवति राध्यति ॥ ८० ॥

(७) स्थिरीकृतौ स्थापयति द्रढयत्यपि बृंहति ।

(८) दधाति धत्ते बिभृते बिभर्ति भरतीति च ॥ ८१ ॥
धरतीत्यात्मनेऽपि द्वौ भुरण्यति धियत्यपि ।
मलते धारयति च मल्लते पोषयत्यपि ॥ ८२ ॥
दधते त्रासयति च स्कुन्दते धारणार्थकाः ।

(९) नियुङ्क्ष आज्ञापयति निर्दिशत्यादिशत्यपि ॥ ८३ ॥
द्वावात्मनेऽपि चाज्ञाया(१०)मथ प्रस्थापयत्यमी ।
स्युः प्रेषणे प्रेषयति प्रेष्यति प्रहिणोति च ॥ ८४ ॥

(११) सन्देशे वादयति च सन्दिशत्यात्मनेऽप्यदः ।

(१२) मुवति क्षिप्यति प्रेरयतीरति कुषुभ्यति ॥ ८५ ॥
नुदाति क्षिपतीत्येतावात्मने कालयत्यपि ।
डिपत्येवं डेपयति लाभयत्यपि डिप्यति ॥ ८६ ॥
ईरयत्येलयति च प्रेरणेऽस्यति विस्यति ।

(१३) सेवते जुषते चापि शेवते क्लेवतेऽपि च ॥ ८७ ॥
खेवते गेवते चापि ग्लेवते प्लेवते तथा ।
मेवते चापि सेवायां भजति श्रपतीति च ॥ ८८ ॥
आत्मनेऽनुरुणद्धेतेऽनुसरत्यनुवर्तते ।

(१४) सम्भक्तौ तु वृणीते स्युर्वनत्येवं सनत्यमी ॥ ८९ ॥

(१५) सजूःकरोत्यात्मनेऽपि साह्वे सत्राकरोति च ॥

(१६) नृणाति लम्भयति च वहत्यपि नयत्यमू ॥ ९० ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनेऽपि प्रापणे स्युः प्रापयत्यापयत्यपि ।
गत्यर्था ये णिजन्तास्ते धातवो नीञ्समर्थकाः ॥ ९१ ॥
(१७) मन्दायते शोठति च लुण्ठत्यपि विलम्बने ।
द्वावात्मनेऽपि समयाकरोति व्याक्षिपत्यमू ॥ ९२ ॥
(१८) प्रतीक्षते प्रतीक्षायां स्युरागमयते तथा ।
अनुपालयतीत्येते प्रतिपालयतीति च ॥ ९३ ॥
(१९) त्वरायां सम्भ्रमति च सम्भ्राम्यति तुरण्यति ।
गुप्यति त्वरते सप्त सम्भ्रम्यति तुतोर्ति च ॥ ९४ ॥
(२०) वैक्लव्ये विक्लवति च टलति ढलतीति च ।
समति स्तमतीत्येते विह्वलत्यपि कन्दते ॥ ९५ ॥
क्रन्दतेऽपि च कैश्चित्तु क्लदते क्रदते स्मृते ।
(२१) क्लीबायते क्लीबते च क्लैब्ये स्युरवगल्भते ॥ ९६ ॥
(२२) कुटति ग्रन्थते हूर्छत्यपि कमरति वङ्कते ।
नसते तुणति कुञ्चत्येवं हरति कुञ्चति ॥ ९७ ॥
भुजति ध्वरतीत्येते कौटिल्ये न्युब्जतीति च ।
(२३) गुप्तोक्तौ स्यान्मन्त्रयते (२४) भेदे तूपजपत्यदः ॥ ९८ ॥
(२५) दम्भेच्छायां धीप्सतीति दिदम्भिषति धिप्सति ।
(२६) संवर्मयति सन्नह्यत्यात्मने सज्जतीत्यमी ॥ ९९ ॥
संयतते दंशयते सन्नाहे पदपञ्चकम् ।
(२७) अध्यास्ते त्वधिशेते चाधिवसत्यधितिष्ठति ॥ १०० ॥
अधिरोहत्यधिक्रामत्यारोहत्यधिरोहणे ।
(२८) स्पन्दने स्पन्दते तद्वत्स्फुरति स्फुलति द्वयम् ॥ १०१ ॥
(२९) चलने चलति प्रेङ्खत्येवं ह्मलति घट्टते ।
वलते वलते वेल्लत्येवं ह्वलति चेलति ॥ १०२ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(३०) उच्छ्राये तटति स्तुप्यत्युच्छ्रायत्यात्मनेऽप्यदः ।

(३१) क्षोभते क्षुभ्यति क्षोभे क्षुभ्नाति च्छान्दसं क्वचित् ॥ १०३ ॥

(३२) प्रतिष्ठतेऽञ्चत्ययते व्रजत्ययति गच्छति ।

ऋणोत्यटति यात्येति सरतीयर्ति सर्पति ॥ १०४ ॥

हम्मति द्रमति त्वङ्गतीङ्गत्यमति मीमति ।

जिहीते कङ्कते नक्षतीखत्यच्छति वभ्रति ॥ १०५ ॥

शङ्कते त्रौकते वस्कर्तेऽहते टीकतेऽभ्रति ।

मस्कते लङ्घते शोणत्यङ्घते त्रङ्कतेऽर्दति ॥ १०६ ॥

पयते वयते विच्छायाति पन्थयतीयते ।

चरण्यति स्त्रङ्कतेऽपि घटते श्वञ्चतेऽङ्गति ॥ १०७ ॥

रङ्गति श्वचते लङ्गतीर्ते ध्वजति ध्वञ्जति ।

चरति घञ्जति शवत्यण्ठते ग्लुञ्चतीष्यति ॥ १०८ ॥

वश्चति म्रोचति म्लोचत्यजति त्वञ्चतीजते ।

फणति द्रवते गाते पद्यते विच्छति क्वचित् ॥ १०९ ॥

पथति क्रामति पतयते रिण्वति रण्वति ।

स्रवति श्यायते धन्वत्यञ्चते सलतीत्यपि ॥ ११० ॥

शुनति छङ्गयति च श्वर्तयत्यपि रेवते ।

ससर्ति च्छान्दसं केचिदेषते नेषते गतौ ॥ १११ ॥

सप्ताशीतिरितोऽप्यन्ये नोक्ता विस्तरतो भयात् ।

(३३) वेगितायां गतौ सप्तामी स्युर्धावति तूर्यते ॥ ११२ ॥

जवति श्वल्लति श्वलत्यपि द्रवति रंहति ।

(३४) डयते डीयते व्योमगते(३५)ऽथाकति चागति ॥ ११३ ॥

चञ्चूर्यतेऽटाट्यते जङ्गम्यते चाप्यरार्यते ।

गत्यर्थी यङ्लुगन्ता ये कुटिलायां गतौ हि ते ॥ ११४ ॥

(३६) वल्गतीति [illegible] ॥

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Contact: mpkv@rsmssb.org.in Digitized by Kashmir Research Institute, Srinagar. Funded by Ramtek University Ramtek Collection

(३७) मन्दायां चापति गतौ (३८) चतुरायां तु धोरति ॥ ११५ ॥

(३९) सन्ततायामतति च (४०) सरति च्छद्मना गतौ ।

(४१) मन्दते विकलायां तु द्वयं खञ्जति खोरति ॥ ११६ ॥

(४२) नाचैः फक्कति (४३) कुत्सायां द्रात्य(४४)थाग्रे पुरत्यदः ।

(४५) पवते वाति वातस्य (४६) वहति प्रवहत्यपाम् ॥ ११७ ॥

(४७) भ्रमति भ्राम्यति भ्रम्यत्यपि पर्यटति भ्रमे ।
घोणते घूर्णते पर्येत्येते घुणति घूर्णति ॥ ११८ ॥

(४८) उद्गच्छत्युन्नमति चाप्युज्जिहीत उदीयते ।
उदञ्चत्युदयस्येतावात्मने द्वावुदेति च ॥ ११९ ॥
गत्यर्थाः प्राय उत्पूर्वा उदयस्याभिधायकाः[10] ।

(४९) आक्रम्यते चाक्रमते ज्योतिष्कर्तृक उद्गमे ॥ १२० ॥

(५०) सञ्चारे चरतीत्येष तृतीयायुक्त आत्मने ।

(५१) पतत्यधोगतौ भ्रंसतेऽपि भ्रश्यति भृश्यति ॥ १२१ ॥
गलति स्रंसतेऽष्टामी च्यवते स्कन्दतीति च ।

(५२) अस्तङ्गमेऽस्तमयने निम्लोचत्यस्तमेति च ॥ १२२ ॥

(५३) इष्यति नश्यति पलायतेऽन्तर्धत्त इत्यपि ।
मुण्ठतेऽपैत्यपक्रामत्येवमाद्याः पलायने ॥ १२३ ॥

(५४) स्कुनाति च स्कुनीते च स्कुनोत्याप्रवतेऽपि च ।
स्कुनुते स्कुन्दते चापि पडाप्रवणवाचिनः ॥ १२४ ॥

(५५) अतिक्रामत्युञ्चरते चाट्टत्यतिचरत्यपि ।
उल्लङ्घयत्यतिक्राम्यत्येवमाद्या अतिक्रमे ॥ १२५ ॥

(५६) चौत्यभिगच्छत्यभियात्यभ्येत्याद्या अभिक्रमे ।

(५७) अभियोगेऽभ्यवस्कन्दत्यड्डत्यास्तिघ्नुतेऽपि च ॥ १२६ ॥

[10] "उदयार्थाभिधायकाः" इति राघवपैशीयं ९।३ श्लोकव्याख्याने पाठः ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्ताभियुङ्क्ते तिक्रोति तिग्नोत्यासेधतीति च ।

(५८) सेनया त्वभियाने स्यादभिषेणयतीति च ॥ १२७ ॥

(५९) सन्निकर्षत्यवष्टभ्नात्यासीदत्यपि नेदते ।

परस्मै द्वौ सन्निकृषतेऽवष्टभ्नोति चान्तिके ॥ १२८ ॥

(६०) प्राप्तौ प्राप्नोति भवते विन्दत्यवरुणद्धि च ।

आत्मनेऽपि द्वयं भावयते लभत ऋच्छति ॥ ११९ ॥

(६१) व्याप्नोति चाश्नुतेऽक्ष्णोति व्याप्तौ श्लाखति शाखति ।

द्वावाचिनोति वेवेष्ट्यात्मनेऽप्यक्षति चेन्वति ॥ १३० ॥

(६२) पर्याप्नोति तु शक्नोति क्षमते प्रभवत्यपि ।

प्रोथत्यलत्यात्मनेऽपि द्वौ पारयति कल्पते ॥ १३१ ॥

राघते लाघते शक्तौ स्फुरते विभवत्यपि ।

(६३) स्युरुद्यमेऽवगुरते वृहत्यडति गूर्यते ॥ १३२ ॥

उद्गारयत उद्युङ्क्ते उद्यच्छत्यात्मनेऽप्यदः ।

(६४) हेडति स्नायति वटत्यपि गुध्यति वण्डते ॥ १३३ ॥

मण्डते वेष्टते वेष्टे मगध्यति मुरत्यपि ।

कृणत्ति गुण्डयति च परिक्षिपति चात्मने ॥ १३४ ॥

(६५) वेष्टनायां वटयति वेष्टयत्यादयोऽपि च ।

(६६) निरुणद्धि निगृह्णाति चात्मने द्वौ निरोधने ॥ १३५ ॥

(६७) आञ्छत्याकर्ष आकर्षत्यायच्छत्यात्मनेऽप्यदः ।

(६८) धृष्णोति चाधिकुरुते धर्षयत्यपि धर्षति ॥ १३६ ॥

जयत्येवं विजयते जयत्यभिभवत्यपि ।

अभ्यस्ति च प्रसहते पराभावयतीति च ॥ १३७ ॥

विमानयत्यभिभवे ह्लीनाति न्यक्करोति च ॥

लङ्घवत्याक्रमति च तरत्याक्रम्पतीति च ॥ १३८ ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(६९) विशेषयत्यतिशये ह्यतिशेते विशेषति ॥
उत्कर्षयत्यञ्चयति विशिनष्टि प्रकर्षति ॥ १३९ ॥
(७०) चित्रीयते लिङ्गयति विस्माययति चाद्भुते ।
(७१) स्यातां कुहयते विस्मापयते हेतुतोऽद्भुते ॥ १४० ॥
(७२) धूनयति धुवति चलयति धूनोति धवति धुनाति च धुनोति ।
चत्वारि चात्मने कम्पयति क्ष्मापयति वाजयति ॥ १४१ ॥
हालयति ह्मालयति ह्वलयति ह्मलयतीति स्युः ॥
तद्वपेद्धोलयति प्रकम्पने डोलयत्यपि च ॥ १४२ ॥
(७३) विलोडयति मथ्नाति मथत्येवं खजत्यपि ।
गाहते मन्थने लुट्यत्यपि लोटति मन्थति ॥ १४३ ॥
(७४) खेटत्युत्त्रासने भाययत्येवं दरयत्यपि ।
(७५) प्रयोजकाद्भये भीषयते भापयतेऽपि च ॥ १४४ ॥
(७६) क्ष्मायते कम्पते त्वङ्गत्येजतीर्ते च वेपते ।
केपते ग्लेपते कम्पे गेपते विजते दश ॥ १४६ ॥
(७७) ताडने ताडयति च हन्ति विध्यति तण्डते ।
प्रहरत्यात्मने सुट्टयति[11] स्फिट्टयतीति च ॥ १४६ ॥
आघट्टयति चास्फालयति जासयतीत्यमी ।
आहतेऽकर्मकत्वे स्यात् स्वकीयेऽङ्गे च कर्माणि ॥ १४७ ॥
(७८) युध्यते सम्प्रहरते युद्धे जजति जञ्जति ।
सम्मर्दयति सङ्ग्रामयतीमे कलहायते ॥ १४८ ॥
(७९) करोत्युपाजेऽन्वाजेभ्यामात्मनेऽपि बलार्पणे ।
(८०) विक्रम्यते वीरयते पराक्रमत इत्यपि ॥ १४९ ॥
प्रगल्भते शूरयते पराक्रम्यत इत्यसौ ।

[11] 'कुट्टयति पिच्छयतीति च" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

ओजायते विक्रमते विक्रमेऽष्टपदी भवेत् ॥ १५० ॥

(८१) अरुष्करोत्यात्मनेऽपि व्रणयत्यङ्गचूर्णने ।

(८२) गोकर्तृकायां हिंसायां प्रस्तुम्पति सुटा भवेत् ॥ १५१ ॥

(८३) हिनस्ति सञ्ज्ञपयति सूदते हन्ति तर्दति ।

तोपति च त्रोपतीषत्यपि तूर्वति थूर्वति ॥ १५२ ॥

तोफति त्रोफति रुशत्यपि तुम्पति त्रुम्पति ।

तुम्फति त्रुम्फति शसत्यूर्वत्यर्वति तोजति ॥ १५३ ॥

नभते भर्वति मषत्येवं नभ्नाति नभ्यति ।

तोभते शर्वति वषत्यपि तुभ्नाति तुभ्यति ॥ १५४ ॥

शूर्यते शेषति तुपत्यपि रोषति रेषति ।

धूर्यते यूषति तुफत्यपि दूर्वति धूर्वति ॥ १५५ ॥

प्रमापयत्यर्दयति निर्वापयति रिष्यति ।

तृणेढि मारयति च श्लथत्यर्दति गूर्यते ॥ १५६ ॥

क्रथत्युज्जासयति च क्राथयत्यपि युथ्यति ।

तृहत्युन्मूलयति[12] च क्षिणाति च कृणाति च ॥ १५७ ॥

प्रतिष्किरत्यालभते तृणात्युन्मथतीति च ।

क्षेणोति च्छषति द्रूणाति कृणोति क्षिणोति च ॥ १५८ ॥

अष्टौ क्षणोति मीनाति स्पृणातीत्यात्मनेऽप्यमी ।

कुन्थति पुन्थति लुन्थति रिशति रुशति हिंसति स्तृहति॥ १५९॥

तृंहति सृम्भति मृणति च चुम्बयति श्रथति च क्लथति ।

सर्भति मेदति दृणति स्फिट्टयति च हिंसयत्यमी चृतति॥ १६०॥

षण्णवतिहिंसायामुक्ताः शिष्टाश्च ये गणे दृश्याः ।

केवालीशेवालीकेवासीमस्मसाशब्दाः ॥ १६१ ॥

[12] "तृहयत्युन्मूलयति" इति मुद्रितपाठः

CC-0. Kalidas Sanskrit University Ramtek Collection

आतालीवर्षालीपार्दालीमसमसाश्च तथा ।
गतिसञ्ज्ञा हिंसायामष्टोद्दिष्टाः करोतेः प्राक् ॥ १६२ ॥

(८४) वस्तयते गन्धयते लुम्बति लुम्बपति चार्दनार्थाः स्युः ।
ओहति तोहति दोहति तद्वत्तुम्बति च तुम्बयत्येते ॥ १६३ ॥

(८५) दृम्फति दृफति दुनोति व्यथयति दुःखयति तपति पीडयति ।
क्लिश्नाति दूनयत्यपि धूपायति खेदयत्याद्याः ॥ १६४ ॥
दुःखाकरोति तुदति च करोति वैकल्पमुदाद्विभ्योऽमी ।
आत्मनेऽपि ग्लपयति लापयत्यपि पाडने ॥ १६५ ॥
रोठते लोठते कुश्नात्यपि मन्थति बाधते ।
एठते हठते तत्र लोटते क्लेशयत्यपि ॥ १६६ ॥
शण्डते शूलति रुजत्यूषत्यामयतीति च ।

(८६) भनक्ति[13] मोटयति च भञ्जयत्यपि मोटति ॥ १६७ ॥
मुटति म्रदते मर्दे मुद्राति च पिनष्टि च ॥
क्षुन्ते क्षुणत्ति सञ्चूर्णयति पाशयतीति च ॥ १६८ ॥

(८७) पंसयति ध्वंसयति च नक्कयति च धक्कयत्येते ।
जम्भयति क्षपयति च नाशयति च नाशनार्थाः स्युः ॥ १६९ ॥

(८८) उन्मूलयत्युञ्जहाति चोत्पाटयति वै समाः ।
उत्खनत्यात्मनेऽप्येते पञ्चोज्जटयतीति च ॥ १७० ॥

(८९) भङ्गे पराभवत्युक्ते पराभवत इत्यमू ।

(९०) जयत्युत्कर्षसम्प्राप्तौ तथा विजयते पदम् ॥ १७१ ॥

इति क्षत्रियचेष्टावर्गः ॥ ३ ॥

४. अथ वैश्यचेष्टावर्गः ॥

(१) कृषसे कृपतीत्येते कृषौ क्षुरति कर्षति ।
रदत्येवं विलिखति हलति स्युः खनत्यपि ॥ १७२ ॥

[13] "अनक्ति" नि।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(२)　बीजाकरोत्युप्तकृष्टौ (३) स्वाद्वितीयाकरोति च ॥
शम्बाकरोति द्विगुणाकरोति द्विः कृषौ त्रयम् ॥ १७३ ॥
(४)　तृतीयात्रिगुणाभ्यां च करोति त्रिः कृषौ मतम् ।
आख्यातानि खनत्वादीन्यूहनीयानि चात्मने ॥ १७४ ॥
(५)　हलिग्रहे हलयति हलिरुक्तो महद्धलम् ॥
(६)　वपत्युप्तौ प्रकिरति वपतेऽप्य (9) थ रोपणे ॥ १७५ ॥
भुलयत्यपि संरोहयति संरोपयत्यपि ॥
(८)　ध्रुवति ध्रवति स्थैर्ये स्थिरीभवति खायति ॥ १७६ ॥
वदत्येते च खदति मूलति प्रतितिष्ठति ।
(९)　पायत्येते वायति च शोषे शुष्यति शुण्ठति ॥ १७७ ॥
अश्यायते शुण्ठयति लङ्घतेऽप्य(१०)थ वर्षति ॥
उनत्ति शीकसे शधत्यपि मर्धति सिञ्चति ॥ १७८ ॥
आर्द्रीकरोति च ज्ञेयमात्मनेऽपि चतुष्टयम् ।
सीकयति तेमयतीत्यादि जेषति सूदति ॥ १७९ ॥
सचखे पर्षति गरत्यपि मेषति मर्षति ॥
बरत्युक्षति सेके स्युर्नेषत्यपि च शिम्प्यति ॥ १८० ॥
गडत्येवं मेहति च तथा मिन्वति निन्वति ॥
क्लिद्यति स्तिम्यति स्तीम्यत्यार्द्रीभावे च तिम्यति ॥ १८१ ॥
(११)　स्युः पुंसयति पुष्णाति दृहत्यादि च वर्धने ।
(१२)　सञ्चये सम्बिभर्तीति सम्भरत्यात्मने त्रयम् ॥ १८२ ॥
सञ्चिनोति खलत्येवं सम्भाण्डयत इत्यपि ।
राशीकरोत्यात्मने द्वौ समूहति समूहते ॥ १८३ ॥
(१३)　उच्चिनोति शिलत्युञ्छे सिलत्युच्चिनुते तथा ।
उञ्छति ध्रासयति च ध्रस्नात्यपि तथेषति ॥ १८४ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(१४) अवहन्तीति वैतुष्यकरणे कण्डयत्यपि ॥
फलीकरोति वितुषीकरोतीत्यात्मने द्वयम् ॥ १८ ॥
परापुनात्यात्मनेऽपि प्रस्फोटयति तत्समम् ।
(१५) मिमीते मायते माने माहते मस्यतीति च ॥ १८६ ॥
शुल्बयत्यपि सम्माति (१६) सम्भवे सम्भवत्यपि ।
(१७) पणते दीव्यति तथाऽऽत्मने व्यवहरत्यदः ॥ १८७ ॥
व्यवहारे च पनते परिवर्तयतीत्यपि ॥
(१८) क्रीणाति चैवं क्रीणीते विसारयति च क्रये ॥ १८८ ॥
(१९) विक्रीणीते निमयतेऽवक्रीणीते च विक्रये ॥
(२०) सत्याकरोत्यात्मनेऽपि तुल्यौ सत्यापयत्यपि ॥ १८९ ॥
(२१) निष्णाति दक्षते चापि नैपुण्ये निपुणत्यपि ।
(१२) अर्जने त्वर्जयति च तथैवार्जति सर्जति ॥ १९० ॥
(२३) कलयत्यपि सङ्ख्याति सङ्ख्याने गणयत्यपि ।
सञ्चष्टे कलते (२४) तुल्यौ वाहन्ति गुणयत्यमू ॥ १९१ ॥
(२९) उत्पुंसयति तु प्रोञ्छे प्रोञ्छत्युत्सारयत्यपि ।
(२६) वण्डति व्युष्यति तथा विभजत्यात्मनेऽप्ययम् ॥ १९२ ॥
विभागे वण्टयति च विभाजयत्यवमाति[14] च ॥
(२७) न्यासे निक्षिप्यति न्यस्यत्येवं परिदधाति च ॥ १९३ ॥
निक्षिपत्यात्मने चोपनिदधाति चतुष्टयम् ।
(२८) तिरोधात्यपिदधात्यन्तर्धौ पिदधाति च ॥ १९४ ॥
तिरस्करोति व्यस्यति च्छन्दत्यपवरत्यापि ।
आवृणोति व्यवदधात्यूर्णोत्यतिदधाति च ॥ १९५ ॥
संवृणोति स्तुणात्येतान्यात्मनेऽपि त्रयोदश ।

[14] "विभाजयत्यवचौति च, विभाजयत्यवयौति च" इति पाठान्तरे।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपवारयति च्छादयति स्थगयतीति च ॥ १९६ ॥
कूलति त्वचतीत्येवं कुम्बयत्यपि कुम्बति ॥
ह्वगति ह्वगतीत्येते थुडति स्थुडतीति च ॥ १९७ ॥
स्तृणोति तिरयत्येवं तृणुते गोपयत्यपि ॥
अपोर्णुते त्वपार्णोति (२९) विवृतौ विवृणोति च ॥ १९८ ॥
तथैवापतृणोति द्वावात्मने निरिणाति[15] च ॥
(३०) अपेक्षतेऽभ्यर्थयते भिक्षतेऽर्दति नाथति ॥ १९९ ॥
याञ्चायां वनुते मार्गत्यमी चतति याचति ।
चदतीत्यात्मनेऽपि स्यु(३१)र्वेथते मार्गयत्यपि ॥ २०० ॥
मार्गत्यप्यञ्चति गवेषयत्यन्वीक्षतेऽपि च ।
अन्वेषते च पयति चिनोतीत्यात्मनेऽप्यदः ॥ २०१ ॥
अन्वेषणे मृगयते मृग्यतीत्यपि केचन ।
(३२) प्रतिदत्ते विनयते निर्यातयति तत्समम् ॥ २०२ ॥
वित्तोत्सर्गे व्ययति च तथा विनयतेऽपि च ।
(३३) दोहानुकूल्ये दुग्धे (३४) गौः प्रस्तुते प्रस्रवे स्वयम् ॥२०३॥
रिणक्ति दोग्ध्यात्मनेऽपि प्रपूरयति दोहने ।
(३५) क्षरणे स्तेपते श्चोतत्यपि क्षरति तेपते ॥ १०४ ॥
रीयते स्यन्दते चैव (३६) स्रवति स्रौति तु स्रवे ॥
(३७) विष्णाति रेचयति च विप्रयुङ्क्ते च रेचति ॥ २०५ ॥
विश्लेषणे स्युर्विश्लेषयति यौति वियौति च ।
(३८) मिश्रयत्यपि संयौति सम्पृक्ते सम्पृणक्ति च ॥ २०६ ॥
मिश्रणे संसृजति च श्रीणातीस्यात्मनेऽप्यदः ।
(१९) सङ्गतौ समियर्तीति सङ्गच्छति समृच्छति ॥ २०७ ॥

[15] "विवृणानि' ति ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

अकर्मकास्त्वात्मनेऽमी सम्बध्नाति मिलत्यपि ।
समवैति व्यतिसृजत्येवं सचत उच्यति ॥ २०८ ॥

(४०) आतञ्चत्यातञ्चने चा (४१) लम्बयत्यासजत्यपि ।
आलम्बने(४२)ऽथ शैथिल्ये श्रन्थते चिल्लतीति च ॥ २०९ ॥ (४३)
ओलण्डयत्युन्नयत उत्क्षिपत्यात्मनेऽप्यदः ।
उलण्डयति चोत्तभ्नात्युत्तभ्नोत्युत्तरत्यपि ॥ २१० ॥
उत्तम्भयति चोत्क्षिप्यत्युत्क्षेपे दोलयत्यपि ।

(४४) अनीतावानयत्येतावात्मनेऽप्याहरत्यपि ॥ २११ ॥

(४५) सम्मार्जयति सम्मार्ष्टि तथा परिसमूहति ।
समुहते च सम्मार्ग (४६) उपदेग्ध्युपलिम्पति ॥ २१२ ॥
पदद्वयं चात्मनेऽपि गोमयत्युपलेपने ॥

(४७) सन्धुक्षयति सन्दीपयतीन्धे ज्वालयत्यपि ॥ २१३ ॥
सन्धुक्षणे ज्वलयति च्छर्दते छर्दयत्यपि ।

(४८) पाके श्रीणाति पचतीत्यात्मने श्रपयत्यपि ॥ २१५ ॥
रन्धयत्यपि विक्लेदयति साधयतीति च ॥
श्रति श्रायति विक्लिद्यत्यपि राध्यति रध्यते ॥ २१५ ॥
पच्यते क्वथ्यते चैते पाके स्युः कर्मकर्तृके ।

(४९) ऋञ्जते भजते भ्राष्ट्रे तूपभृज्जति भृज्जते ॥ २१६ ॥

(५०) शूलाकरोत्यात्मनेऽपि शूलपाके पदं मतम् ।

(५१) द्रवीकृतौ लीनयति लयति द्रावयत्यपि ॥ २१७ ॥
ढालयत्यपि छाययत्यपि लीपयतीत्यमी ॥

(५२) द्वौ सन्दधात्यभिषुणोत्यात्मने द्वौ च शुच्यति ॥ २१८ ॥
तथा चुच्यत्यभिषवे (५३) संस्कृतौ संस्करोत्यदः ॥
आत्मने (५४) प्रतियत्ने तु स्यादुपस्कुरुते पदम् ॥ २१९ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(५८) स्वादते स्वर्दते रुच्यां स्वदते रोचतेऽपि च ॥

इति वैश्यचेष्टावर्गः ॥ ४ ॥

५. अथ शूद्रचेष्टावर्गः ॥

(१) वयते वयति व्यूतावूयते(२)ऽथ विषीव्यति ॥ २२० ॥

स्यूतौ निषीव्यति तथा परिषीव्यति सीव्यति ।

(३) तक्ष्णोति तक्षति तनयति त्वक्षति तक्षणे ॥ २२१ ॥

तनूकरोत्यात्मनेऽपि परिवासयतीति षट् ।

(४) उत्तेजयति तीक्ष्णत्वे सङ्क्षुते क्ष्णौति निश्यति ॥ २२२ ॥

निशिनोति निशीशांसत्यात्मनेऽपि मतं द्वयम् ।

(६) लुनाति लुम्पति तथा छिनत्तीत्यात्मने त्रयम् ॥ २२३ ॥

त्रुटति च्छोटयति च चुटति च्छुटतीति च ।

छेदने वर्धयति च च्छ्यति वृश्चति कृन्तति ॥ २२४ ॥

चतुर्दश त्रोटयति द्यति च्छेदयतीत्यमी ।

(६) त्रोटति त्रुव्यति च्छेदे छिद्यते कर्मकर्तृके ॥ २२५ ॥

(७) भिन्ते विदारयति च भिनत्ति द्यति मुण्डति ।

बिलति स्फोटयति च दृणात्याखण्डयत्यपि ॥ २२६ ॥ ।

मुस्यति च्छिद्रयति च दारयत्यपि भेदने ।

(८) दहति श्रेषति श्लेषत्यपि प्रोषति चूर्यते ॥ २२७ ॥

तापयत्योषति तपत्यपि प्लुष्यति कुण्डते ।

दाहे कुटयति प्लोषत्यमी (९) तत्र तु गर्हिते ॥ २२८ ॥

दन्दह्यते दन्दहीति दन्दग्धीति पदत्रयम् ।

(१०) ग्रोचति स्तेनयति च चुरण्यति च रुण्टति ॥ २२९ ॥

स्तेये चोरयति ग्लोचयति कोजति खोजति ॥

मुष्णाति लुण्टयति च मूषत्यपहरत्यदः ॥ २३० ॥

आत्मने(११)ऽप्यास्कन्दतीति जहतीति बलाद्धृती ।

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(१२) प्रसहत्यात्मनेऽप्येष हठतीति बलात्कृतौ ॥ २३१ ॥

(१३) धूर्तक्रियायां शठति द्राघते मङ्घते त्रयम् ॥

(१४) निष्कुष्णाति च निष्कर्षे निष्कर्षति च तूलति ॥ २३२ ॥
स्यान्निष्कुलाकरोत्येतदात्मने चा(१५)त्र सव्यथे ॥
डाज्निष्पन्नासपत्राभ्यां करोति कुरुते परे ॥ २३३ ॥

(१६) सन्दानयति बध्नाति मूर्वत्यन्दति कीलति ।
पाशयत्यन्तति जुटति सिनुते च कञ्चते ॥ २३४ ॥
कचते टङ्कयति च योजयत्यपि मव्यति ।
काञ्चते ग्रन्थयति च सिनाति च सिनोति च ॥ २३५ ॥
संयच्छत्यात्मने षट् स्युर्नह्यत्यपि दधाति च ॥
युनातीति पवते च बन्धे मवति योजति ॥ २३६ ॥

(१७) स्तम्भते स्कम्भते स्तम्भे वस्यत्यपि च पीलति ।
स्तनोति प्रतिबध्नाति स्तभ्नाति स्तम्भयत्यपि ॥ २३७ ॥
स्कभ्नोति चैव स्कभ्नाति स्तुभ्नोति स्कम्भयत्यपि ।
स्तुभ्नाति चैव स्कुभ्नाति स्कुभ्नोत्येतानि षोडश ॥ २३८॥

(१८) साहसिक्ये प्रकुरुते (१९) दुःखयत्यघयत्यपि ॥
कष्टायते दुष्कृतेऽमी (२०) प्रत्यवैति तु दुष्यति ॥ २३९ ॥
विघ्ने विहन्त्यन्तरेति प्रत्यूहत्यात्मनेऽप्यदः ।
विघ्नयत्यन्तरयति विच्छिन्ते विच्छिनत्ति च ॥ २४० ॥

(२१) सन्ताने[16] सन्तनोतीति निर्वहत्यात्मने द्वयम् ॥
तथा सत्रपते सन्तानयतीति चतुष्टयम् ॥ २४१ ॥

इति शूद्रचेष्टावर्गः ॥ ५ ॥
इति द्वितीयकाण्डः ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

[16]'सन्ततौ" इति पाठान्तरम् ॥

अथ तृतीयकाण्डः ।

प्रकीर्णकसनाद्यन्तनानार्थान्यात्मनेपदे ।
तदन्यस्मिन् विभागश्च सङ्गृह्यन्तेऽत्र वर्गशः ॥ १ ॥

१. अथ प्रकीर्णकवर्गः ॥

यानि पूर्वेमसङ्गत्या नैवाख्यातान्यचक्षत ।
वक्ष्यन्ते तानि वर्गेऽस्मिन् प्रकीर्णाख्ये यथास्मृति ॥ २ ॥

(१) विभाति व्युच्छते व्युष्टे प्रभाति विविशत्यपि ॥

(२) श्विन्दते श्वेतते त्रीणि स्युः शुक्लत्वेऽवदायति ॥ ३ ॥

(३) रज्यति त्रीणि रजति लोहितायति चात्मने ।
शोणतीति च रञ्जिम्नि (४)श्यामत्वे श्यामलायते ॥ ४ ॥
नीलायते नीलति च तथा श्यामायते पदम् ॥

(५) विन्दत्यवयवे भिन्दत्यवयौति सटत्यपि ॥ ५ ॥

(६) सङ्घाते झटति श्रोणत्येवं जटति पूलति ॥
गोष्टते लोष्टते श्लोणत्यपि म्रक्षति पिण्डते ॥ ६ ॥
श्लोकते हुण्डते पिण्डयति पूलयतीत्यपि ॥
शण्डतेऽथो मुस्तयति स्त्यायत्यश्नोति चाक्षति ॥ ७ ॥

इति प्रकीर्णकवर्गः ॥ १ ॥

२. अथ सनाद्यन्तवर्गः ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(१) धातोस्तुमर्थादिच्छायां सनि रूपं बुभूषति ।
शिशिक्षिषत इत्यादि पूर्ववच्चात्मनेपदम् ॥ ८ ॥

(२) सुपो मान्ताव्ययान्यस्मात्क्वचित्काम्यतिकर्मणः ॥
आत्मनस्तु तदिच्छायामर्थे शब्दद्वयं भवेत् ॥ ९ ॥
पुत्रकाम्यति पुत्रीयत्यृक्काम्यत्यृच्यतीति दिक् ॥

(३) एवं कर्मण अधारादाचारादुपमार्थकात् ॥ १० ॥
क्वचित्पुत्रीयति च्छात्रं मञ्चे सौधीयतीति दिक् ॥

(४) उपमानात्तथा कर्तुराचारार्थे क्यङि क्विपि ॥ ११ ॥
द्वे रूपे भवतो यद्वद्गर्दभोऽश्वायतेऽश्वति ।

(५) क्ययोजोऽप्सरसोर्नित्यं पय आदेस्तु वा सलुक् ॥ १२ ॥
कन्याऽप्सरायते त्वोजायतेऽहिः कं पयायते ।
पयस्यते तथाऽन्यस्मात्सलोपादि[17] समूह्यताम् ॥ १३ ॥

(६) च्व्यर्थे भृशादेर्हल्लोपे क्यङ्यच्च्व्यन्ताद्भृशायते[18] ।
सुमनायत इत्यादिरूपाण्यूह्यानि सर्वतः ॥ १४ ॥
भृशः शश्वत्तृपद्रेहद्वेहद्वर्चोऽथ दुर्मनाः ।
सुमना उन्मना ओजोऽभिमनाश्चपलः शुचिः ॥ १५ ॥
मन्दरेफन्मद्रभद्रपण्डिताण्डरकण्डराः ।
उत्सुको हरितो नीलः फेनः शीघ्रो भृशादयः ॥ १६ ॥

(७) तत्रैव डाज्लोहितादेः क्यषि वा चात्मनेपदम् ॥
दिग्लोहितायतीत्यादि डाचः पटपटायति ॥ १७ ॥
लोहितजिह्मश्यामा सुखदुःखे धूमचर्मगर्वाश्च ।
हर्षो मूर्छा निद्रा कृपा च करुणादयोऽप्यवृत्करणात् ॥ १८ ॥

17* "तथाऽन्यस्मात्सलोपे वा दिगूह्यताम्" इति पाठान्तरम् ॥

18"क्यङित्यर्थे भृशायते" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(८) कष्टात्सत्राच्च कक्षाच्च कृच्छ्राद्गहनतोऽपि च ॥
कष्टायते प्रभृतयः पापार्थे क्रमणे यङि ॥ १९ ॥

(९) तं वर्तयति रोमन्थाद्रोमन्थायत इत्यदः ।

(१०) बाष्पोष्मफेनादुद्वान्ताविदं वाष्पयतेमुखम् ॥ २० ॥

(११) सुखादेः स्यादनुभवत्यर्थे दुःखायतेमुखाः ।
सुखदुःखास्त्रकृपणकरुणालीकतृप्रवत् ॥ २१ ॥
कृच्छ्रप्रतीपसोढाः स्युरमी दश सुखादयः ।

(१२) शब्दादिषु कृतौ शब्दायते वैरायतेमुखाः ॥ १२ ॥
शब्दादयस्तु सूत्रोक्ता वार्तिकोक्ता अटादयः ।
अटाट्टशीकाकोटाश्च सोटापृष्ठौ च दुर्दिनम् ॥ २३ ॥
पोटापृष्वा च सुदिनं नीहारश्चेत्यटादयः ।

(१३) तपस्यतीत्यादिकं तु प्रायः पूर्वं प्रदर्शितम् ॥ २४ ॥

(१४) कण्ड्वादेर्यकि कण्डूयत्यात्मनेऽपि हृणीयते ।
असूयतीत्यादिकं च प्रायः प्रागेव कीर्तितम् ॥ २५ ॥

(१८) धातोर्हलादेरेकाचः पौनःपुन्ये भृशे यङि।
चेक्रीयतेप्रभृतयो न भृशार्थे[19] शुभो रुचः ॥ २६ ॥

(१६) बहुलं लुकि तत्रापि बोभोत्यादिकमूह्यताम् ।

(१७) सूचिसूत्र्यूर्णुमूत्र्यर्त्यव्यशिभ्यश्च यङिष्यते ॥ २७ ॥
सासूच्यतेऽटाट्यतेऽर्यत इत्यादिकं ततः ॥

(१८) गत्यर्थेभ्यस्तु कौटिल्ये लुपादेर्भावगर्हणे ॥ २८ ॥
याङि जङ्गम्यते लोलुप्यत इत्यादिकं भवेत् ॥

(१९) प्रयोजकस्य व्यापारे धातुमात्राकृतेर्णिचि[20] ॥ २९ ॥

[19]अनेन निषेधेन "भृशं रोचते शोभते इत्यत्र यक् नेति भाष्यम्" इति सिद्धान्तकौमुद्यां दीक्षितोक्तिरपि सङ्गच्छते ॥

[20]धातुमात्रात्कृतं णिचि" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावयत्यादि तत्रोह्यं णिचश्चेत्यात्मनेपदम् ।

(२०) सुबन्ताणिचि धात्वर्थे बहुलं भादि चेष्टवत् ॥ ३० ॥

(२१) तत्करोतीति मुण्डादेः बटुं मुण्डयतीति दिक् ॥

(२२) स्थूलादेस्तु तदाचष्टे स्थवयत्यादिकं भवेत् ॥ ३१ ॥

(२१) सत्यार्थवेदादापुकू च स्यात्सत्यापयतीति दिक् ।

(२४) श्वेताश्वादश्वतरतो लोपोऽश्वतरयोणिचि ॥ ३२ ॥

गालोडिताह्वारकयोर्लुप्येते इतकौ तथा ।

श्वेतयत्यश्वयति गालोडयत्याह्वरयति ॥ ३३ ॥

(२५) णिच् कृतत्वचवर्णेभ्यस्तं गृह्णात्यर्थ इष्यते ॥

अत्वं च हलिकल्योः स्या(२६)न्निध्याने रूपशब्दतः ॥३४॥

(३७) विमोके संयमे पाशा(१८)त्तूस्ताद्विहनने भवेत् ।

(२९) भोजने तन्निवृत्तौ च व्रतशब्दाण्णिचो विधिः ॥ ३५ ॥

(३०) परिधाने समाच्छादे वस्त्रा(३१)ल्लोम्नोऽनुमार्जने ।

(३२) तेनातिक्रामत्यर्थेऽश्वयति हस्तयतीति च ॥ ३६ ॥

(३३) सेनाशब्दातृतीयान्तादाभयाने तु सः ष च ।

(३४) वीणया उपगाने स्यात् (३५) सन्नाहे वर्मणो भवेत् ॥३७॥

(३६) चुर्णादवध्वंसनेऽर्थे (१७) तुलाण्णिजवकोषणे ॥

(३८) श्लोकादुपस्तुतौ (३९) वास्याः परेश्छेदन इष्यते ॥ ३८ ॥

(४०) णिङङ्गात्तन्निरसने दिग्धस्तयत आदिकम् ॥

(४१) पुच्छादुदसने णिङ् स्यात्पयसे व्यसनेऽपि च ॥ ३९ ॥

(४२) चीवरात्सञ्चये चार्थे परिधाने च णिङ् भवेत् ।

(४३) भाण्डात्समाचिनोत्यर्थे णिङ् सम्भाण्डयते हि दिक् ॥ ४० ॥

(४४) निर्दिष्टार्थे कृतस्तस्मादुपसर्गादितोऽपि च ।

कंसं घातयतीत्यादिविहृयेऽन्यो णिजुच्यते ॥ ४१ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्यक्षमिव कंसादेः साधनत्वेन[21] मन्यते ॥

उक्तं हि भर्तृहरिणा महाभाष्यानुसारिणा ॥ ४२ ॥

शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान् ।

प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते ॥ ४३ ॥

इति सनाद्यन्तवर्गः ॥ २ ॥

अथ नानार्थवर्गः ॥

अथ नानार्थधातूत्थान्याख्यातानीह कानिचित् ।

यथामति प्रदर्श्यन्ते व्यक्तं भूवाद्यनुक्रमात् ॥ ४४ ॥

गणेऽवधारणात्क्वापि सूत्रे तेन विशेषणात् ।

क्वाप्यर्थान्तरनिर्देशादनेकार्था हि धातवः ॥ ४५ ॥

अथ भ्वादिगणः ॥

(1) भवतीत्येष सत्तायां प्राप्तिसम्पत्तिजन्मसु , ॥

आद्योपलम्भे पर्याप्तौ सामर्थ्ये प्रभवत्ययम् , ॥ ४६ ।

सम्भावनायां माने च साहित्ये सम्भवत्यसौ, ॥

शक्तिप्राप्त्योर्विभवति, प्राकट्ये व्युद्भवत्यपि ॥ ४७ ॥

(२) ग्रन्थप्रतिष्ठालिप्सासु गाधते (३) नाथनीति तु ॥ ।

याञ्चोपतापैश्वर्येषु (४) तेष्वाशिषि च नाथते ॥ ४८ ॥

(५) स्तवेऽभिवादने चापि वन्दते (६) भन्दते पुनः ॥

सौख्यकल्याणयो(७)र्मोदमदस्वप्नगतिस्तुतीः ॥ ४९ ॥

आह मन्दत इत्येत(८)द्दद्दते दानधारणे ॥

(९) क्रीडायामूर्दते माने (१०) हादते हादशब्दयोः ॥ ५० ॥

(११) कुन्थति पुन्थति लुन्थति मन्थति मान्थत्यमी पञ्च ।

हिंसासंक्लेशनयो(१२)श्चन्दत्याह्लाददीपनयोः ॥ ५१ ॥

(१३) गतिमाङ्गल्यशास्त्रेषु सेधति (१४) स्थैर्यहिंसयोः ।

[21] "साधनत्वेन मन्यते" इति पाठान्तरम् ।

CC-0. Ramtek Tulsi Gurukul Maha Sanskrit University Ramtek Collection

खदत्य(१५)थार्दति गतियाञ्चाहिंसासु सम्मतम् ॥ ५२ ॥

(१६) कन्दति क्रन्दति क्लदत्याह्वाने रोदने त्रयम् ।

(१७) द्रेकते धेकते शब्दोत्साहयो(१८)श्चकते पुनः ॥ ५३ ॥

तृप्तौ च प्रतिघाते च (१९) गत्याक्षेपे तु मङ्घते ॥

कैतवे (२०) द्राघते त्वेतत्सामर्थ्यायामयोर्मतम् ॥ ५४ ॥

(२१) गतौ लङ्घत इत्येतन्निवृत्तौ भोजनस्य च ॥

(२२) शोषणे चालमर्थे च राखत्योखति लाखति ॥ ५५ ॥

द्राखति ध्राखतीत्येते (२३) गतौ त्वङ्गति कम्पने ।

(२४) मञ्चते धारणोच्छ्रायपूजनेष्व(२५)थ कञ्चते ॥ ५६ ॥

दीप्तिबन्धनयो(२६)र्गत्यामोजते कुत्सनेऽपि च ॥

(२७) शाठ्यमेदनदम्भेषु[22] मुश्चते मचते पदम् ॥ ५७ ॥

(२८) स्थानार्जनोपार्जनगतिवृजेः स्यादर्जने पदम् ॥

(२९) स्यात्सम्पर्चनकौटिल्य प्रतिष्टम्भविलेखने ॥ ५८ ॥

तारे शब्दे कोचतीति (३०) याञ्चागत्योस्तथाऽञ्चते ।

(३१) तयोश्च पूजने चाञ्चत्य(३२)जति क्षेपणे गतौ ॥ ५९ ॥

(३३) कौटिल्याल्पीभवनयोः कुञ्चति क्रुञ्चतीत्युभे ।

(३४) मूर्छत्येष समुच्छ्राये मोहे स्यात् (३५) खर्जतीति तु ॥ ६० ॥

व्यथने पूजने (३६) हिंसात्राणयोस्तुञ्जतीत्ययम् ।

(३७) शब्दे गजति मादे च (३८) हिण्डतेऽनादरे गतौ ॥ ६१ ॥

(३९) अतिक्रमे च हिंसायामट्टते (४०) मुण्ठते शुचौ ।

पलायने च (४१) कटति वर्षावरणयोर्गतौ ॥ ६२ ॥

(४२) शटत्ययं विशरणे गतौ रुज्यवसादने ।

(४३) बाल्ये च परिभाषायां लटतीत्य(४४)थ पेटति ॥ ६३ ॥

22 "शाठ्यमेचिनदम्भेषु मुश्चते शशपारिदम्" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

शब्द सङ्घातयो(४५)र्मादे निवासे च मठत्यदः ।

(४६) हठतीति बलात्कारे प्लुतौ शङ्कन्दनेऽपि च ॥ ६४ ॥

(४७) हिंसासङ्क्लेशयोः पेठत्य(४८)थो शठति कैतवे ॥

तयोश्चा(४९)थो लुण्ठतीति गतावालस्य एव च ॥ ६५ ॥

(५०) तेपते क्षरणे कम्पे (५१) ग्लेपते दैन्यकम्पयोः ॥

(५२) अवस्रंसे प्रमादे च स्रंसते (५३) लम्बते पुनः ॥ ६६ ॥

शब्दे चावस्रंसने च (५४) मानसे च जपत्ययम् ।

(६५) हिंसाभाषणयो शोभत्य(५६)त्र दीप्तौ च शुम्भति ॥ ६७ ॥

(५७) शब्दे रणति गत्यां तु घटादावेष पठ्यते ।

(५८) पैणति प्रेरणाऽऽश्लेषगमनेषु पदं त्रिषु ॥ ६८ ॥

(५९) लौहित्ये शोणति गतौ (६०) सम्भक्तौ वनति ध्वनौ ।

(६१) दीप्तिकान्तिगतिष्विष्टं त्रिष्वर्थेषु कनत्यदः ॥ ६९ ॥

(६२) गतौ च शब्दसम्भक्त्योरमतीति प्रयुज्यते ।

(६३) क्रमते क्रम्यते स्यातां तापनोत्साहवृत्तिषु ॥ ७० ॥

(६४) नयते रक्षणे गत्यां (६५) दयते तु तयोरपि ।

आदानदानहिंसासु (६६) क्रूयते क्लेदशब्दयोः ॥ ७१ ॥

(६७) पूयते स्याद्विशरणे दुर्गन्धे चा(६८)थ तायते ।

पालने स्फीततायाश्च (६९) प्रेप्सागत्योश्च हर्यति ॥ ७२ ॥

(७०) भ्रंशेऽदने गलति च (७१) शब्द सङ्घानयोर्द्वयोः ।

कलते (७२) वालते त्वेष चलने संवृतावपि ॥ ७३ ॥

(७३) भलते भल्लते हिंसादानयोः परिभाषणे ॥

(७४) चलने सञ्चये चोक्तः खलतीति (७५) फलत्यदः ॥ ७४ ॥

आदितश्चेद्विशरणे निष्पत्तौ स्यादनादितः ॥

(७६) अलतेऽलति भूषायां मर्यादौ वारणे द्वयम् ॥ ७५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri | Panini Kanya Maha Vidyalaya Collection.

(७७) गतौ जग्धौ च चरति (७८) सङ्घाते रुजि शूलति ।

(७९) हिंसाकरणयोः कृण्वेः कृणोति प्रापणेऽपि च ॥ ७६ ॥

(८०) पराभिभूतावुत्कर्षे जयत्यन्ते त्वकर्मकः ।

(८१) स्वाम्यर्थदानावगतिप्रवेशयाञ्चागतीच्छाश्रुतितृप्त्यवाप्तीः ।७७ ॥

आलिङ्गरक्षाद्युतिभागवृद्धिहिंसाक्रियाश्चावतिरेष वक्ति ।

(८२) धुक्षते धिक्षते सन्दीपनक्लेशनजीवने ॥ ७८ ॥

(८५) हिंसाविश्राणनगतिष्वीषते स्यात्तु (८४) दक्षते ॥

शैघ्र्यवृद्ध्योर्घटादौ तु तदेव गतिहिंसयोः ॥ ७९ ॥

(८५) स्यान्मौण्ड्येज्योपनयनव्रतादेशेषु दीक्षते ।

(८६) जिज्ञासने च विद्याया ग्रहणे चापि शिक्षते ॥ ८० ॥

(८७) कासते कफने शब्दे दीप्तौ चायं प्रयोगतः ॥

(८८) द्राङ्क्षति ~ध्राङ्क्षति ध्वाङ्क्षतीच्छायां घोरवाशिते ॥ ८१ ॥

(८९) अक्षत्यक्ष्णोति सङ्घाते व्याप्तावप्य (९०)थ मर्षति ।

सहने सेचने (९१) श्लेषक्रीडयोर्लसतीत्यदः ॥ ८२ ॥

(९२) जर्जति द्वे चर्चति सन्तर्जने परिभाषणे ॥

(९३) उरसा गमने दाने वृद्धावपि च मोहने ॥ ८३ ॥

(९४) वेदते स्नेहने मोक्षे (९५) दीप्तौ स्वादे च रोचते ।

(९६) प्रमादे स्त्रंसते चावस्त्रंसने ध्वंसने गतौ ॥ ८४ ॥

(९७) क्षञ्जते दानगत्योः स्याद् (९८) व्यथते चलने भये ।

(९९) कम्पे विलसने चार्थे कम्पते चलतीत्यमू ॥ ८५ ॥

(१००) हलतीति पदं गत्यां तदेव चलने मितम् ॥

(१०१) हर्षग्लेपनयोर्मित्वान्मदेर्मदयतीति णौ ॥ ८६ ॥

(१०२) बलतीत्येष धान्यस्यावरोधे प्राणनेऽपि च ॥

(१०३) बन्धुक्रियायां हांस्यामे कोलतीत्य(१०४)थ हेलति ।८७॥

CC-0. Nilmani Mukherjee Memorial (Jadavpur) Digital Collection

स्याद्धिंसासंवरणयोः (१०५) क्रोशत्याह्वानरोदने ।

(१०६) सीदति स्याद्विशरणे गतावप्यवसादने । ८८ ॥

(१०७) सम्पर्चने तु कौटिल्ये प्रतिष्टम्भे विलेखने ।

तारे शब्दे कोचतीति ज्वलादेरितरस्य च ॥ ८९ ॥

(१०८) मिथ्याज्ञानेऽनवस्थाने भ्रमति भ्राम्यतीत्युभे ।

स्त्यायतेः[23] प्रागात्मनेऽपि (१०९)गतिशुद्धयोस्तु धावति ॥ ९० ॥

(११०) पदं भूषणपर्याप्तिवारणेष्वलतीत्यदः ।

(१११) दीप्त्यादानगतिष्विष्टमसतीत्य(११२)थ चीवति ॥ ९१ ॥

स्यादादाने संवरणेऽप्य(११३)थ हिंसनमेधयोः ॥

मेदत्येत(११४)न्मेधति तु सङ्गमे च तयोरपि ॥ ९२ ॥

(११) कुत्सायां सन्निकर्षे च नेदतीत्य(११६)थ वेणति ।

चिन्तानिशामनगतिवादित्रग्रहबुद्धिषु ॥ ९३ ॥

(११७) निशामनेऽर्चने चायय(११८) स्पेशति बाधने ॥

स्पर्शने (११९) वहतीत्येतत्स्यन्दने प्रापणे धृतौ ॥ ९४ ॥

(१२०) झपत्यादानसंवृत्योः हिंसायां चेन्न चात्मने ॥

(१२१) यजतीति तु देवार्चादानसङ्गतिकर्मसु ॥ ९५ ॥

(१२२) हयति स्पर्धने शब्दे (१२३) वपत्युप्तौ च मुण्डने ।

(१२४) दाने निरसने दीप्तावप्यवास्वेषतीत्यदः ॥ ९६ ॥

(१२५) शब्दसङ्घातयोर्धात्वोः स्त्यायत्य(१२६)थ धमत्यदः ।

कृशानुफूत्कृतौ शब्दे(१२७)ऽप्युपतापे स्वरत्यपि ॥ ९७ ॥

(१२८) ऋच्छेर्गतीन्द्रियलयमूर्तिभावेषु ऋच्छति ।

ऋच्छादेशे तदेवार्तेः शिति स्यात्प्रापणे गतौ ॥ ९८ ॥

(१२९) सवतीति पदं धात्वोः प्रसवैश्वर्ययोर्गतौ ।

[23] इत उत्तरं (१०९) स्त्यायतेः प्रागात्मनेऽपि (१०९) गतिशुद्धयोस्तु धावति ॥ इति पाठः ।

CC-0. Kashi Vishvanath Shastri Jyotishya Granthalaya Collection

(१३०) प्लवे तरत्युत्तरणे (१३१) स्कन्दतीति तु शोषणे ॥ ९९ ॥
गत्या(१३२)मथो नमत्येतनमस्कारेऽपि शब्दने ।
(१३३) सेवने सचते तद्वत्सपवाये सचत्यपि ॥ १०० ॥
(१३४) वदते तूक्तिविषयभासनोत्साहवृत्तिषु ।
(१२५) सहतेऽभिभवे क्षान्तौ गतिवृद्ध्योः श्वयत्ययम् ॥ १०१ ॥
(१३३) पवते रक्षणादौ च सोमस्य मरुतो गतौ ॥
(१३७) निर्णेतृत्वेन भजने तिष्ठते स्वप्रकाशने ॥ १०२ ॥
(१३८) देवार्चासङ्गतिकृतिमैत्रीषु पथिकर्तृके ।
धात्वर्थे मन्त्र[24]करणेऽकर्मके चोपतिष्ठते ॥ १०३ ॥।
परस्मैपदमन्यत्र लिप्सयोपस्थितौ न वा ॥

इति भ्वादिगणः ॥

अथादादिगणः ।

(१३९) गतिगन्धनयोर्वाति (१४०) हन्तीति गतिहिंसयोः ॥१०४॥
(१४१) ग्रहणेऽप्युपहन्त्येतदशुचीकरणेऽपि च ॥
(१४२) वेतीति कान्तिगमनप्रजनासनखादने ॥ १०५ ॥
(१४३) गतिशासनयोः कस्त (१४४) इर्ते तु गतिकम्पयोः ।
(१४५) ईट्टे स्तुतौ[25] गतिनायां याञ्चप्रेरणभोजने ॥ १०६ ॥
(१४६) व्यक्तवाचि भवेच्चष्टे दृष्टौ (१४७) यौति तु मिश्रणे ।
अमिश्रणेऽपि (१४८) सौतीति प्रसवैश्वर्ययोर्मतम् ॥१०७॥
(१४९) मानविश्वासयोः प्रत्येत्य(१५०)ध्येत्यधिगमे स्मृतौ ॥
(१५१) भक्षे जक्षिति हसने (१५२) दीधीते भासि देवने ॥ १०८॥
(१५३) वेवीते वेति तुल्यार्थश्छान्दसाविति भाष्यकृत् ॥
(१५४) तवीति तौति वृद्ध्यर्थे हिंसायां पूरणे गतौ ॥ १०९ ॥

[24] "मन्त्रणे चार्थे" इति पाठान्तरम् ॥
[25] "स्तुतौ वर्धनायां याञ्चा प्रेरणपूरणे" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यदादिगणः ।
अथ जुहोत्यादिगणः ।

(१५५) जुहोति हविरासेके दानेऽप्येके (१५६) पिपर्ति तु ॥
पालने पूरणे (१५७) दीप्तौ क्षरणायें जिघर्त्यदः ॥ ११० ॥

(१५८) बभस्ति भर्त्सने दीप्तौ (१९५९) मिर्भाते मानशब्दयोः ॥

(१६०) नेनेक्ति पोषणे शौचे (१६१) बिभर्ति धृतिपोषयोः ॥१११॥
तयोर्दधाति दाने चाभिदधात्युक्तिबन्धयोः ॥
श्रद्दधाति तु विस्रम्भस्पृहयोः पञ्च चात्मने ॥ ११२ ॥

इति जुहोत्यादिगणः ।
अथ दिवादिगणः ।

(१६२) विजिगीषागतिक्रीडाव्यवहारद्युतिस्तुतीः ।
दीव्यतीत्याह (१६३) गत्यां तु शोषणे स्त्रीव्यतीत्यदः॥ ११३॥

(१६४) क्रस्यति ह्वरणे दीप्तौ (१६५) व्रीडतीत्येष चोदने ।
लज्जयां चा(१६६)थ हिंसायां त्वरणे चापि तूर्यते ॥११४॥

(१६७) धूर्यते गूर्यते चोभे गतिहिंसनयोर्मते ॥

(१६८) हिंसायां च वयोहानौ घूर्यते जूर्यते पदे ॥ ११५ ॥

(१६९) हिंसायां शूर्यते स्तम्भेऽप्य(१७०)थ संराद्धिहिंसयोः ।
रध्यत्यु(१७१)पक्रमज्ञानस्वीकारे प्रतिपद्यते ॥ ११६ ॥

(१७२) विक्लित्तिक्षणवृध्यादौ[26] राध्यत्येतदकर्मकम् ॥

(१७३) हर्षणे मोचने दृप्यत्य(१७४)थ ग्लानौ च ताम्यति ॥११७॥
काङ्क्षायामपि (१७५) खेद तु श्राम्यत्येष तपस्यपि ॥

(१७६) मोचने क्ष्विद्यति स्नेहे (१७७) गात्रस्थौल्येऽपि मेद्यति।११८।

इति दिवादिगणः ।
अथ स्वादिगणः ॥

[26]"विक्लित्तीक्षणवृध्यादौ, विपक्तिक्षणवृध्यादौ" इति पाठान्तरे ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(१७८) पीडने मन्थने स्नाने सन्धानेऽभिषुणोत्यदः ॥

आत्मनेऽप्य(१७९)थ वृद्धौ च हिनोतीति गतावपि ॥ ११९॥

(१८०) सङ्घाते चाश्नुते व्याप्तौ (१८१) स्पृणोति प्रीतिपालने ।

इति स्वादिगणः ।

अथ तुदादिगणः ।

(१८३) जुषते सेवने प्रीतौ (१८३) विजते चलने भये ॥ १२० ॥

(१८४) युद्धनिन्दादानहिंसाकत्थनेषु रिफत्यदः ।

(१८५) शब्दोपकृत्योः कुणति (१८६) चुतति ग्रन्थहिंसयोः ॥ १२१ ॥

(१८७) गतिकौटिल्यहिंसासु द्रुणतीत्य(१८८)थ खण्डने ।

छेदे खुरति (१८९) भीमार्थशब्दयोर्घुरतीत्यदः ॥ १२२ ॥

(१९०) ऐश्वर्यदीप्त्योः सुरति (१९१) किलति श्वैत्यखेलयोः ।

(१९२) इलति प्रेरणे स्वप्नेऽप्य(१९३)थाक्षेपप्रमर्दयोः ॥ १२३ ॥

मुटत्य(१९४) थ कुडत्येतद्बाल्ये च घमने मतम् ।

(१९६) निवासगत्योः क्षियति (१९६) गतौ स्थैर्य ध्रुवत्यदः ॥ १२४ ॥

॥ इति तुदादिगणः ॥

॥ अथ रुधादिगणः ॥

(१९७) दीप्तिदेवनयोश्छृन्ते घृणत्तीति (१९८) तृणत्यदः ।

तृन्ते हिंसानादरयो(१९९)र्विनक्ति चलने भये ॥ १२५ ॥

(२००) अनक्ति म्रक्षणगतिकान्तिव्यक्तिषु कीर्तितम् ।

इति रुधादिगणः ॥

अथ तनादिगणः ।

(२०१) साहसिक्यप्रकथनोपयोगेषु च सेवने ॥ १२६ ॥

पदं प्रकुरुते(२०२)ऽथाधिकुरुतेऽभिभवे तथा ।

क्षान्तौ (२०३) विकुरुते शब्दकर्मकेऽर्थेऽप्यकर्मकः ॥१२७॥

(२०४) ऊर्युरर्यूररीभ्यश्च करोति कुरुते पदे ॥

विस्ताराङ्गीकरणयोः (२०५) प्रतियत्ने तु वेकृते ॥ १२८ ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपस्कुरुत इत्येतद्वाक्याध्याहारयोरपि ।

(२०६) हृष्टभक्षार्थिनीडार्थिविहङ्गमचतुष्पदाम् ॥ १२९ ॥

आलेखनेऽपस्कुरुत आत्मनेपदसुद्विधेः ।

॥ इति तनादिगणः ॥

॥ अथ कथादिगणः ॥

(२०७) कान्तितर्पणयोः प्रीणात्य(२०८)थ श्रीणाति मिश्रणे ॥ १३० ॥

पाके चा(२०९)थ पृणातीति पालने पूरणेऽपि च ।

(२१०) अश्नाति प्रतिहर्षेऽपि मोचने चा(२११)थ पूरणे ॥ १३१ ॥

प्रुष्णाति द्वे च प्लुष्णाति मोचने स्नेहने त्रिषु ।

(२१२) गृह्णात्येतदुपादाने ज्ञाने गृह्णीत इत्यपि ॥ १३२ ॥

(११३) अवष्टभ्नात्यवष्टभ्नोत्यन्तिकालम्बनार्थकौ ।

॥ इति क्र्यादिगणः ॥

॥ अथ चुरादिगणः ॥

(२१४) दर्शनाङ्कनयोर्लक्षयत्य(२१५)थोर्जयतीति तु ॥ १३३ ॥

बलप्राणनयोः (२१६) कुट्टयति च्छेदनभर्सने[27] ।

(२१७) गत्यसंस्कारयोः शाठयति श्वठयति द्वयम् ॥ १३४ ॥

(२१८) भाषाहिंसाबलादाननिकेतेषु च पञ्चसु ।

पदं तुञ्जयतीत्याह तथा पिञ्जयतीत्यपि ॥ १३५ ॥

(२१९) मण्डयत्येष भूषायां हर्षे पुस्तयतीत्यपि ।

(२२०) स्यादादरानादरयोस्तथा बुस्तयतीत्यदः ॥ १३६ ॥

(२२१) मार्गसंस्कारगत्योः स्याद्वाजयत्येतदर्थयोः ।

(२२३) ज्ञापने मारणादौ च ज्ञपयत्येतदीरितम् ॥ १३७ ॥

(२२३) छेदने पूरणे चापि वर्धयत्येतदर्थयोः ।

(२२४) संश्लेषणे च ग्रहणे पदं स्पाशयते भवेत् ॥ १३८ ।

[27] "च्छेदे च कृन्ते" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(२२५) चेतनायां वेदयते तथाऽऽख्याने विवासने ।

(२२६) निकारे चाप्युपस्कारे यातयत्येतदीरितम् ॥ १३९ ॥

(२२७) निर्यातयति वैरस्य शुद्धौ न्यासार्पणे हृतौ ॥

(२२८) छेदने स्नेहने चापि हरणे वासयत्यदः ॥ १४० ॥

(२२९) सम्पर्चने मोहने च रेचयत्यपि रेचति ।

(२३०) श्रदायां चोपकरणे तानयत्युपतापने ॥ १४१ ॥

(२३१) शौचालङ्कारयोर्मार्जयति मार्जति चरितम् ।

(२३२) लावने क्षालने चार्थे स्यात्पल्पूलतीत्यदः ॥ १४२ ॥

(२३३) वर्णक्रियायां विस्तारे गुणोक्तौ वर्णयत्यदः ॥

॥ इति चुरादिगणः ॥
॥ अथ नामधातवः ॥

(२३४) ऋतीयिते धिग्घृणयोः (२३५) पूजावृद्ध्योर्महीयते ॥१४३॥

(२३६) भोजने तन्निवृत्तौ च पदं व्रतयतीत्यदः ।

॥ इति नामधातवः ॥
॥ अथ कण्ड्वादयः ॥

(२३७) रोषे च वैमनस्ये[28] च मन्तूयति पदं विदुः ॥ १४४ ॥

(२३८) माधुर्यपूजयोर्वल्गूयति (२३९) स्यात्तु हृणीयते ॥

रोषमन्दाक्षयोः (२४०) स्वप्ने धौर्त्ये लेट्यति लोट्यति १४५

॥ इति कण्ड्वादयः ॥
इति नानार्थवर्गः ॥ ३ ॥
४. अथात्मनेपदपरस्मैपदवर्गः ॥

(१) भावे कर्मणि सर्वस्माद्धातोः स्यादात्मनेपदम् ।

ङिच्चस्तथाऽनुदात्तेभ्यो भूयतेऽप्यायतेऽयते ॥ १४६ ॥

(२) क्रियाव्यतिहृतौ तद्वद्व्यतिस्ते व्यतिषिञ्चते ।

(३) शब्दार्थहसावहहृगतिहिंसार्थकान्न तत् ॥ १४७ ॥

[28] "वै मत्सरे" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यतिभ्यां जल्पति हसत्येति हन्तीत्यमूर्दिशः ॥
नात्र सम्प्रवहन्ते सम्प्रहरन्ते निषेधनम् ॥ १४८ ॥

(४) परस्परेतरान्योन्योपपदानात्मनेपदम् ॥
अन्योन्यस्य व्यतिलुनन्त्येषा दिङ् (५) निपराद्विशेः ॥ १४९ ॥

(६) परिव्यवेभ्यः क्रोणाते (७) जयतेर्विपरापरात् ।

(८) आङो दाञो विकासस्वास्यप्रसारणयोर्न हि ॥ १५० ॥

(९) गमेः क्षमायां णेराङि नुपृच्छ्योः (१०) क्रीडतेरनोः ।
पर्याङ्भ्याञ्च(११)समोऽकूजे(१२)र्जिज्ञासायां शकेः सनः ॥ १५१ ॥

(१३) अपस्किरो(१४)ऽथो हरतेर्गेतिताच्छील्य[29] (१५) आशिषि ।
नाथः (१६) शपेस्तु शपयं (१७) स्थो निर्णीतौ प्रकाशने ॥ १५२ ॥
प्रतिज्ञायामावसंविप्रा(१८)दुदोऽनूर्ध्वचेष्टने ।

(१९) देवार्चासङ्गतिकृतिमैत्रीषु[30] पथिकर्तृके ॥ १५३ ॥
धात्वर्थे मन्त्रकरणेऽकमेके चोपपूर्वकात् ।
वा लिप्सायां(२०)समः प्रच्छिगम्यृच्छिस्पृश्रुवेत्तितः॥ १५४॥
दृशोऽर्तेश्चाकर्मकेभ्य (२१) आङ्पूर्वाभ्यां यमेर्हनः ।

(२२) उद्विभ्यां तपतेः स्वाङ्गकर्मकेभ्योऽप्य(२३)थास्यतेः ॥ १५५ ॥
ऊहश्च सोपसर्गाद्वा (३४) हो निसंव्युपपूर्वकात् ।

(२५) आङस्तु स्पर्धने (२६) सूचनावक्षेपणसेवने ॥ १५६ ॥
प्रतियत्ने प्रकथनोपयोगे साधने कृञः ।

(२७) अधेः प्रसहने (२८) वेस्तु शब्दकर्मण्यकर्मकात् ॥ १५७ ॥

(२९) पुजाचार्यकृतिज्ञानोत्सञ्जनेषु भृतौ व्यये ।
नीञो वेगणने (३०) कर्तृस्थिते चामूर्तकमणि ॥ १५८ ॥

[29] "हरतेर्गतिकौटिल्य" इति पाठान्तरम् ॥
[30] "देवार्चासङ्गकरणमैत्रीषु" इति पाठान्तरम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(३१) वृत्युत्साह क्रपे(३३)स्तद्वत्परोपयोः ।

(३३) ज्योतिरुद्गमने चाङो (३४) वेः पादविहृतार्थकात् ॥ १५९ ॥

(३५) आरम्भणार्थे प्रोपाभ्यां (३६) विभाषाऽनुपसर्गकात् ।

(३७) अपह्नवेऽकर्मकाच्च ज्ञो(३८)ऽनाध्याने प्रतेः समः ॥ १६० ॥

(३९) यत्नोपसान्त्वनज्ञानासनेषूपनिमन्त्रणे ॥

विमतौ चापि वदतेः (४०) समनुभ्यां त्वकर्मकात् ॥ १६१ ॥

(४१) व्यक्तवाचां सहोक्तौ च (४२) विप्रलापे विभापया ॥ १६२ ॥

(४३) सृजेः श्रद्धावति श्यंश्च यथा मालां हि सृज्यते ॥

(४४) ग्रोऽवात् (४५) समः प्रतिज्ञाने(४६)चरेरुदि सकर्मकात् १६३ ॥

(४७) समस्तृतीयायुक्तात् (४८) स्वीकरणे तूप यच्छते ॥

(४९) तृतीयाचेच्चतुर्थ्यर्थे दाणः (५०) शिति शदे(५१) र्मृङः ॥ १६४ ॥

लुङ्लङोश्च (५२) कृञि प्राग्वदामो यस्तु प्रयुज्यते ।

(५३) सनो[31] ज्ञाश्रुस्मृदृशिभ्यो नानोज्ञ आङ्वतेः श्रुवः ॥ १६५ ॥

(५४) अयज्ञपात्रेषु युजेरजाद्यन्तोपसर्गतः ॥

(५५) समः क्ष्णाते(५६)रनवने भुजेरपि च (५७) णेरणौ ॥ १६६ ॥

यत्कर्म णौ स कर्ता चेद्भवेदाध्यानवर्जिते ॥

यथाऽऽरोहयने हस्ती स्वयं दर्शयते नृपः ॥ १६७ ॥

(५८) भीस्म्योः प्रयोजकाद्भीतिस्मययो(५९)वञ्चतेर्गृधः ।

प्रलम्भने (६०) लियः पूजान्यक्कृत्योर्वञ्चनेऽपि च ॥ १६८!!

(६१) मिथ्याशब्दोपपदतः पौनःपुन्ये कृञो णिचः ।

(६२) फले च कर्त्रभिप्राये स्वरितेतो ञितो णिचः ॥ १६९ ॥

पचते कुरुते स्नानं कटं कारयते यथा ।

चुरादेरपि लक्षेर्यः स्वरितेत्त्वमनार्षकम् ॥ १७० ॥

[31] "सनश्च स्मृशिभ्यामननोज्ञोऽराङ्वतेः" दृशिभ्यां च नानोज्ञेना ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection

(६३) अपाद्वदः (६४) समाङुच्च्यो यमेरग्रन्थगोचरे ॥

(६५) ज्ञश्चोपसर्गरहिताच्छब्दान्तरगतौ तु वा ॥ १७१ ॥

णिजर्थे च यजेर्नित्यं सामान्योक्तौ न तत् स्मृतम् ॥

यथा धरित्री दुदुहुः (६६) कृञोऽप्यनुपरापरात् ॥ १७२ ॥

(६७) क्षिपोऽभिप्रत्यतिभ्यः (६८) प्राद्वहे(६९)मृषिवहोः परेः।

(७०) व्यापारिभ्यो रम(७१) उपा(७२)द्विभाषा[32] चेदकर्मकः १७३

(७३) आहारचलनार्था ये गण्यन्ते ये त्वकर्मकाः ।

चित्तवत्कर्तुकास्तद्वत्तोषयत्येष पार्थिवम् ॥ १७४ ॥

(७४) प्रुद्रुस्रुबुधजनयुधेङ्गशिभ्यश्च णिचो यतः ।

(७५) न पादम्याङ्यमाङ्यसपरिमुहुचिवद्वसः ॥ १७५ ॥

नृतिधेद्विबतिभ्यश्च (७६) क्यषन्तात्तु विभाषया ।

(७७) द्युतादेर्लङि (७८) यः स्यसनो(७६)र्लुटि च कल्पतेः ॥१७६॥

परस्मैपद(८०)मन्यस्मात्तथा शिष्टप्रयोगतः ॥ १७७ ॥

इत्यात्मनेपदपरस्मैपदवर्गः ॥ ४ ॥

॥ इति तृतीयकाण्डः ॥

॥ इति भट्टमल्लविरचिताऽऽख्यातचन्द्रिका समाप्ता ॥

[32] "उपात्"इति योगविभागो 'विभाषे'त्यनेन 'उप' मात्रस्यैव सम्बन्धार्थस्तेन 'उप' पूर्वकादेव रमरकर्मकात् विभाषा परस्मैपदं न तु व्यापारिभ्योऽपि । एतच्च 'व्याङ्ः परिभ्यो रमः" "उपाच्च" "विभाषाऽकर्मकात्" (पा० सं० १।३।८३-८५) इति पाणिनियोगविभागपर्यालोचनपुरःसरमेवेति बोध्यम् ॥

CC-0. Kavikulguru Kalidas Sanskrit University Ramtek Collection